किंच पितेति धाताकर्मफलविधातावेद्यंज्ञेयंवस्तु पवित्रंशोधकम् ऋग्वेदादयोवेदाश्चअहमेव स्पष्टमन्यत् १७ किंच गतिरिति गम्यतइतिगतिःफलम् भर्त्ता पोषणकर्त्ता प्रभुःनियंता साक्षीशुभाशुभद्रष्टा निवासःभोगस्थानम् शरणंरक्षकः सुहृद्धितकर्त्ता प्रकर्षेणभवत्यनेनेतिप्रभवःस्रष्टा प्रलीयतेऽनेनेतिप्रलयःसंहर्त्ता तिष्ठत्यस्मिन्निितिस्थानमाधारः निधीयतेऽस्मिन्नितिनिधानंलयस्थानम् बीजंकारणम् तथाप्यव्ययमविनाशि नतुव्रीह्यादिबीजवन्नश्वरमित्यर्थः १८ किंच तपामीति आदित्यात्मनास्थित्वानिदाघसमयेतपामि जगनस्तापंकरोमि वृष्टिसमयेचवर्षमुत्सृजामि विमुंचामि कदाचित्तुवर्षंनिगृह्णामि

पिताऽहमस्यजगतोमाताधातापितामहः वेद्यंपवित्रमोंकारऋक्सामयजुरेवच १७ गतिर्भर्त्ताप्रभुःसाक्षीनिवासःशरणंसुहृत् प्रभवःप्रलयःस्थानंनिधानंबीजमव्ययम् १८ तपाम्यहमहंवर्षंनिगृह्णाम्युत्सृजामिच अमृतंचैवमृत्युश्चसदसच्चाहमर्जुन १९ त्रैविद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते

आकर्षामि अमृतंचजीवनम् मृत्युश्चनाशः सत्स्थूलंदृश्यम् असच्चसूक्ष्ममदृश्यम् एतत्सर्वमहमेवेति मत्वामामेव बहुधाउपासतइति पूर्वेणैवान्वयः १९ तदेवमवजानंतिमांमूढाइतिश्लोकद्वयेनक्षिप्रफलाशयादेवतांतरंभजंतोमांनाद्रियंतइत्यभक्तादर्शिताः महात्मानस्तुमांपार्थेत्यादिनाचभक्ताउक्ताः तत्रैकत्वेनवापृथक्त्वेनवापरमेश्वरंश्रीवासुदेवंयेनभजंति तेषांजन्ममृत्युप्रवाहोदुर्वारइत्याह त्रैविद्यामामिति ऋग्यजुःसामलक्षणास्तिस्रोविद्यायेषांतेत्रिविद्याः त्रिविद्याएवत्रैविद्याः स्वार्थेतद्धितः तिस्रोविद्याअधीयंते जानं

तानिवात्रैविद्याः वेदत्रयोक्तकर्मतत्पराइत्यर्थः वेदत्रयविहितैर्यज्ञैर्मामिष्ट्वाममैवरूपंदेवतांतरमित्यजानंतोऽपिवस्तुतइंद्रादिरूपेणमामेवेष्ट्वासंपूज्ययज्ञ
शेषंसोमंपिबंतिइतिसोमपाः तेनैवपूतपापाः शोधितकल्मषाः संतः स्वर्गतिंस्वर्गंप्रतिगतिंयेप्रार्थयंते तेपुण्यफलरूपंसुरेंद्रस्यलोकंस्वर्गमासाद्यप्रा
प्यदिविस्वर्गेदिव्यानुत्तमान्देवानांभोगानश्नंति भुंजते २० ततश्चतेतंभुक्त्वेति तेस्वर्गकामास्तंप्रार्थितंविपुलंस्वर्गलोकंतत्सुखंभुक्त्वाभोगप्रापके
पुण्येक्षीणेसतिमर्त्यलोकंविशंति पुनरप्येवमेववेदत्रय्याविहितंधर्ममनुसृताः कामकामाः भोगान्कामयमानाः यातायातंलभंते २१ मद्भक्तास्तु

तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगान् २० तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकंविशंति ए
वंत्रयीधर्ममनुप्रपन्नागतागतंकामकामालभंते २१ अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते तेषांनित्याभियुक्तानांयोगक्षे
मंवहाम्यहम् २२ येऽप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः तेऽपिमामेवकौंतेययजंत्यविधिपूर्वकम् २३ मत्प्रसादेनकृता

र्थाभवंतीत्याह अनन्याइति अनन्याः नास्तिमद्व्यतिरेकेणान्यत्काम्यंभजनीयंदेवतांतरंयेषांतथाभूतायेजनाः मांचिंतयंतःसेवंते तेषांनित्याभियुक्तानां
सर्वदामदेकनिष्ठानांयोगंधनादिलाभंक्षेमंचतत्पालनंमोक्षाख्यंचतैरप्रार्थितमप्यहमेववहामि प्रापयामि २२ननुत्वद्व्यतिरेकेणवस्तुतोदेवतांतरस्या
भावादिंद्रादिसेविनोऽपित्वद्भक्ताएवेतिकथंतेगतागतंलभेरंस्तत्राह येपीति श्रद्धयोपेताभक्ताः संतोयेऽपिजनाः यज्ञेनान्यदेवताइंद्रादिरूपाः येभजंति तेऽपि-
मामेवयजंतीतिसत्यम् किंतु अविधिपूर्वकंमोक्षप्रापकंविधिंविनायजंति अतस्तेपुनरावर्त्तंते २३

एतदेवविवृणोति अहंहीति सर्वेषांयज्ञानांतत्तद्देवतारूपेणाहमेवभोक्ता प्रभुश्चस्वामी फलदाताऽपिचाहमेवेत्यर्थः एवंभूतंमांतेतत्त्वेनयथावन्नाभिजानंति अतश्च्यवंतिप्रच्यवंते पुनरावर्त्तंते २४ येतुसर्वदेवतासुमामेवांतर्यामिणंपश्यंतोयजंतितेतुनावर्त्तंते तदेवोपपादयति यांतीति देवेषुइंद्रादिषुव्रतंनियमोयेषांतेअंतवतोदेवान्यांति पितृषुव्रतंयेषांश्राद्धादिक्रियापराणांतेपितॄन्यांति भूतेषुविनायकमातृकादिषुइज्यापूजायेषांतेभूतानियांति मांयष्टुंशीलंयेषांतेमद्याजिनस्तेतुमामक्षयंपरमानंदरूपंनारायणंयांति २५ तदेवंस्वभक्तानामक्षयफलत्वमुक्तम् अनायासत्वंस्वभक्तेर्दर्शयति पत्रमिति

अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच नतुमामभिजानंतितत्त्वेनातश्च्यवंतिते २४ यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः भूतानियांतिभूतेज्यायांतिमद्याजिनोऽपिमाम् २५ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रयच्छति तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः २६ यत्करोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणम् २७

पत्रपुष्पादिमात्रमपिमह्यंभक्त्या-प्रीत्यायःप्रयच्छति तस्यप्रयतात्मनः शुद्धचित्तस्यनिष्कामभक्तस्यतत्पत्रपुष्पादिकंतेनभक्त्याउपहृतंसमर्पितमहमश्नामि प्रीत्यागृह्णामि नहिमहाविभूतिपतेः परमेश्वरस्यक्षुद्रदेवतानामिव बहुवित्तसाध्ययागादिभिःपरितोषःस्यात् किंतु भक्तिमात्रेण अतोभक्तेनसमर्पितंयत्किंचित्पत्रादिमात्रमपितदनुग्रहार्थमेवाश्नामिइतिभावः २६ नचपत्रपुष्पादिकमपियज्ञार्थपशुसोमादिद्रव्यवन्मदर्थमेवोद्यमैरापाद्यसमर्पणीयम् यदिति स्वभावतोवाशास्त्रतोवा

यत्किंचित्कर्मकरोषि तथायदश्नासि यज्जुहोषि यद्ददासि यत्तपस्यसितपःकरोषि तत्सर्वंमय्यर्पितंयथाभवत्येवंकुरुष्व २७ एवंचयत्फलंप्राप्स्यसि-
तच्छृणु शुभेति एवंकुर्वन्कर्मबंधनैः कर्मनिमित्तैरिष्टानिष्टैः फलैर्मुक्तोभविष्यसि कर्मणांमयिसमर्पितत्वेनतवतत्फलसंबंधानुपपत्तेः तैश्चमुक्तः सन्
संन्यासयोगयुक्तात्मासंन्यासः कर्मणांमदर्पणंसएवयोगस्तेनयुक्तः आत्माचित्तंयस्यतथाभूतस्त्वंमांप्राप्स्यसि २८ यदिभक्तेभ्यएवमोक्षंददासि नाभ
क्तेभ्यश्चतर्हिनवापिकिंरागद्वेषादिकृतंवैषम्यमस्तिनेत्याह समइति समोऽहंसर्वेष्वपिभूतेषु अतोमेममप्रियश्चद्वेष्यश्चनास्त्येव एवंसत्यपियेमांभजं

शुभाशुभफलैरेवंमोक्ष्यसेकर्मबंधनैः संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि २८ समोऽहंसर्वभूतेषुनमेद्वेष्योऽस्ति
नप्रियः येभजंतितुमांभक्त्यामयितेतेषुचाप्यहम् २९ अपिचेत्सुदुराचारोभजतेमामनन्यभाक् साधुरेवसमंतव्यःस
म्यग्व्यवसितोहिसः ३०

तितेभक्तामयिवर्त्तंते अहमपितेषुअनुग्राहकतयावर्त्ते अयंभावः यथाऽग्नेःस्वसेवकेष्वेवतमःशीतादिदुःखम
पाकुर्वतोऽपिनवैषम्यम् यथावा कल्पवृक्षस्य तथैवभक्तपक्षपातिनोऽपिममनवैषम्यम् किंतु मद्भक्तेरेवंमहिमेति २९ अपिच मद्भक्तेरविनवर्यः प्र
भावइतिदर्शयन्नाह अपिचेदिति अत्यंतंदुराचारोऽपियदिपृथक्त्वेननरोदेवतांनरभक्तिमकुर्वन्मामेवश्रीनारायणंभजते नहिंसाधुः श्रेष्ठएवसमंतव्यः ५७
यतोऽसौसम्यक्व्यवसितः परमेश्वरभजनेनैवकृतार्थोभविष्यामीतिशोभनमध्यवसायंकृतवान् ३० ७ ७ ७

निश्चयात्मकः १

त्रिश्रयात्मक मात्र ।१०।१

ननुकथंसमीचीनाध्यवसायमात्रेणसाधुर्मंतव्यस्तत्राह क्षिप्रमिति दुराचारोऽपिमांभजन्शीघ्रंधर्मचित्तोभवति ततश्चशश्वच्छांतिंशाश्वतीमुपशांतिंप
रमेश्वरनिष्ठांनितरांगच्छतिप्राप्नोति कुतर्ककर्कशवादिनोनैतन्मन्येरन्निति शंकाव्याकुलचित्तमर्जुनंप्रोत्साहयति हेकौंतेय पटहकहलादिमहाघोषपू
र्वकंविवदमानानांसभांगत्वाबाहुमुत्क्षिप्यनिःशंकंप्रतिजानीहि प्रतिज्ञांकुरु कथंमेपरमेश्वरस्यभक्तोदुराचारोऽपिनप्रणश्यति अपितुकृतार्थएव
भवतीति ततश्चतेत्वत्प्रौढिविजृंभविध्वंसितकुतर्कानिःसंशयंत्वामेवगुरुत्वेनआश्रयेरन् ३१ आचारभ्रष्टंमद्भक्तिः पवित्रीकरोतीतिकिमत्र-

क्षिप्रंभवतिधर्मात्माशश्वच्छांतिंनिगच्छति कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति ३१ मांहिपार्थव्यपाश्रित्ययेऽ
पिस्युःपापयोनयः स्त्रियोवैश्यास्तथाशूद्रास्तेऽपियांतिपरांगतिम् ३२ किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा अ
नित्यमसुखंलोकमिमंप्राप्यभजस्वमाम् ३३ चित्रम् यतोमद्भक्तिः दुःकुलानप्यनधिकारिणोऽपिसंसारान्मोचयतीत्याह मांहीति येऽ
पिपापयोनयःस्युः निकृष्टजन्मानोंऽत्यजादयोभवेयुः येऽपिवैश्याः केवलंकृष्यादिनिरताः स्त्रियःशूद्रादयश्चाध्ययनादिरहिताः तेऽपिमांव्यपाश्रित्यसे
व्यपरांगतिंयांति हिनिश्चितम् ३२ यदेवंनदासत्कुलाः सदाचाराश्चमद्भक्ताः परांगतिंयांतीतिकिंवक्तव्यमित्याह किमिति पुण्याःसुकृतिनोब्राह्मणाः
तथाराजानश्चतेऋषयश्चक्षत्रियाः एवंभूताः परांगतिंयांतीतिकिंवक्तव्यम् अतस्त्वमिमंराजर्षिरूपंलोकंदेहंप्राप्यलब्ध्वामांभजस्व किंच अनित्यमध्रुवं
सुखरहितंचलोकंदेहंप्राप्यानित्यत्वाद्विलंबमकुर्वन् असुखत्वाच्चसुखार्थोद्यमंहित्वामामेवभजस्वेत्यर्थः ३३

भजनप्रकारंदर्शयन्नुपसंहरति मन्मनाइति मय्येवमनोयस्यसमन्मनास्त्वंभव तथैवममैवभक्तःमत्सेवकोभव मद्याजीमद्यजनशीलोभव मामे
वनमस्कुरु एवमेभिःप्रकारैर्मत्परायणःसन् आत्मानंमनोमयियुंक्त्वासमाधायमामेवपरमानंदरूपमेष्यसि प्राप्स्यसि ३४ निजमैश्वर्यमाश्च
र्यंभक्तेश्चाद्भुतवैभवम् नवमेराजगुह्याख्येकृपयाऽवोचदच्युतः १ इतिसुबोधिन्यांटी॰ नवमोऽध्यायः ९ ॥ उक्ताःसंक्षेपतःपूर्वंसप्त-
मादौविभूतयः दशमेनावितन्यंतेसर्वत्रेश्वरदृष्टये १ एवंतावत्सप्तमादिभिस्त्रिभिरध्यायैर्भजनीयंपरमेश्वररूपंनिरूपितम् तद्विभूत

मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु मामेवैष्यसियुक्त्वैवमात्मानंमत्परायणः ३४ इतिश्रीमद्भ॰राजविद्याराज
गुह्ययोगोनामनवमोऽध्यायः ९ श्रीभगवानुवाच भूयएवमहाबाहोशृणुमेपरमंवचः यत्तेऽहंप्रीयमाणाय
वक्ष्यामिहितकाम्यया १

यश्चसप्तमेरसोऽहमप्सुकौंतेयेत्यादिनासंक्षेपतोदर्शिताः नवमेचअहंक्रतुरहंयज्ञइत्यादिना अथेदानींताएवविभूतीःप्रपंचयिष्यन् स्वभक्ते-
श्चावश्यंकरणीयत्वंवर्णयिष्यन् श्रीभगवानुवाच भूयएवेति महांतौयुद्धादिस्वधर्मानुष्ठानेमहत्परिचर्यायांकुशलौबाहूयस्य हेमहाबाहो
भूयएवपुनरपिमेवचःशृणु कथंभूतम् परमंपरमार्थनिष्ठम् मद्वचसाअमृतेनेवप्रीतिंप्राप्नुवतेतेतुभ्यंहितकाम्ययाहितेच्छयायदहंवक्ष्यामितत् १ ५८

उक्तस्यापिपुनर्वचनेदुर्ज्ञेयत्वहेतुमाह नमइति मेममप्रभवंप्रभवंजन्मरहितस्यापिनानाविभूतिभिराविर्भावंसुरगणाअपिमहर्षयोभृग्वादयोऽपि नजानंति तत्रहेतुः अहंहिदेवानांमहर्षीणांचादिः कारणम् सर्वशः सर्वप्रकारैः उत्पादकत्वेनबुद्ध्यादिप्रवर्त्तकत्वेनवा अतोमदनुग्रहंविनामांकेऽपिनजानंतीत्यर्थः २ एवंभूतात्मज्ञानेफलमाह योमामिति सर्वकारणत्वादेवनविद्यतेआदिः कारणंयस्यतमनादिम् अतएवाजंजन्मशून्य

नमेविदुःसुरगणाः प्रभवंनमहर्षयः अहमादिर्हिदेवानांमहर्षीणांचसर्वशः २ योमामजमनादिंचवेत्तिलोकमहेश्वरम् असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहःक्षमासत्यंदमःशमः सुखंदुःखंभवोभावोभयंचाभयमेवच ४

म् लोकानांमहेश्वरंचमांयोवेत्ति समर्त्त्येषुअसंमूढः संमोहरहितः सन्सर्वपापैः प्रमुच्यते ३ लोकमहेश्वरतामेवस्फुटयति बुद्धिरितित्रिभिः बुद्धिःसारासारविवेकनैपुण्यम् ज्ञानमात्मविषयम् असंमोहः व्याकुलत्वाभावः क्षमासहिष्णुत्वम् सत्यंयथार्थभाषणम् दमोबाह्येंद्रियसंयमः शमोंऽतःकरणसंयमःसुखमनुकूलसंवेदनीयम् दुःखंतद्विपरीतम् भवउद्भवः अभावस्तद्विपरीतः भयंत्रासः अभयंतद्विपरीतम् अस्यश्लोकस्योत्तरेणमत्तएवभवंतीत्यनेनान्वयः ४

किंच अहिंसेति अहिंसापरपीडानिवृत्तिः समतारागद्वेषादिराहित्यम् मित्रामित्रतुल्यताच तुष्टिः दैवलब्धेनसंतोषः तपः शारीरादिवक्ष्यमाणम् दा नंन्यायार्जितधनादेः सत्पात्रार्पणम् यशः सत्कीर्तिः अयशोऽपकीर्तिः एतेबुद्धिर्ज्ञानमित्यादयस्तद्विपरीताश्चाबुद्ध्यादयोनानाविधाभावाः प्राणि नांमत्तः सकाशादेवभवंति ५ किंच महर्षयइति सप्तमहर्षयोभृगवादयः सप्तब्राह्मणाइत्येतेपुराणेनिश्चयंगताइत्यादिपुराणप्रसिद्धाः ते

अहिंसासमतातुष्टिस्तपोदानंयशोयशः भवंतिभावाभूतानांमत्तएवपृथग्विधाः ५ महर्षयःसप्तपूर्वेचत्वारोमन वस्तथा मद्भावामानसाजातायेषांलोकइमाःप्रजाः ६ एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः सोऽविकंपेनयोगेन युज्यतेनात्रसंशयः ७

भ्योऽपिपूर्वेऽन्येचत्वारोमहर्षयः सनकादयः तथामनवः स्वायंभुवादयः मदीयोभावः प्रभावोयेषु ते हिरण्यगर्भात्मनोममैवमनसः संकल्पमात्राज्जाताः प्रभावमेवाह येषामिति येषांभृगवादीनांचसनकादीनांच मनूनांचइमाब्राह्मणाद्यालोके वर्त्तमानाः पुत्रपौत्रादिरूपाः शिष्यादिरूपाश्चप्रजाजालावर्त्तंते ६ यथोक्तविभूत्यादितत्वज्ञानस्यफलमाह एतामिति एतांभृगवादिलक्षणांमम विभूतिंयोगैश्वर्यलक्षणंतत्त्वतोयोवेत्तिसनिः संशयेनयोगेनसम्यग्दर्शनेनयुक्तोभवति नास्त्यत्रसंशयः ७ ७ ७ ७

यथाच्चविभूतियोगयोर्ज्ञानेनसम्यग्ज्ञानावाप्तिस्तद्दर्शयति अहमितिचतुर्भिः अहंसर्वस्यजगतःप्रभवः भृग्वादिमन्वादिरूपविभूतिद्वारेणोत्पत्तिहेतुः म
त्तएवचास्यसर्वस्यबुद्धिर्ज्ञानमसंमोहइत्यादिसर्वंप्रवर्त्ततइति एवंमत्वाः वबुद्ध्यबुधाः विवेकिनोभावसमन्विताः प्रीतियुक्तामांभजंते ८ प्रीतिपू
र्वकंभजनमेवाह मच्चित्ताइति मय्येवचित्तंयेषांतेमच्चित्ताः मामेवगताः प्राप्ताः प्राणाइंद्रियाणियेषांतेमद्गतप्राणाः मदर्पितजीवनाइतिवा एवंभू
तास्तेबुधाः अन्योन्यंमांन्यायोपेतैःश्रुत्यादिप्रमाणैःबोधयंतः बुध्वाचमांकथयंतःसंकीर्तयंतःसंतःतुष्यंति अनुमोदनेनतुष्टियांति रमंतिच नि

अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते इतिमत्वाभजंतेमांबुधाभावसमन्विताः ८ मच्चित्तामद्गतप्राणाबोधयंतःपरस्परम् क
थयंतश्चमांनित्यंतुष्यंतिचरमंतिच ९ तेषांसततयुक्तानांभजतांप्रीतिपूर्वकम् ददामिबुद्धियोगंतंयेनमामुपयांतिते १० तेषा
मेवानुकंपार्थमहमज्ञानजंतमः नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता ११

र्वृत्तिंयांति ९ एवंभूतानांचसम्यक्ज्ञानमहंदास्यामी
त्याह तेषामिति एवंसततंयुक्तानांमय्यासक्तानांप्रीतिपूर्वकंभजनांतंबुद्धिरूपंयोगमुपायंददामितेषाम् तमितिकम् येनतेभक्तामांप्राप्नुवंति १० बुद्धियो
गंदत्वाचतस्यानुभवपर्यंतंमापाद्याविद्याकृतंसंसारंनाशयामीत्याह तेषामिति तेषामनुकंपार्थमनुग्रहार्थमेवाज्ञानाज्जातंतमः संसाराख्यंनाशयामि कुत्र
वास्थितः सन्केनसाधनेनतमोनाशयसीत्यतआह आत्मभावस्थः बुद्धिवृत्तौस्थितःसन् भास्वताविस्फुरताज्ञानलक्षणेनदीपेननाशयामि ११ ६७

संक्षेपेणोक्ता विभूतिर्विस्तरेण जिज्ञासुर्भगवन्तं स्तुवन् अर्जुन उवाच परं ब्रह्मेति सप्तभिः परं ब्रह्म च परं धाम च आश्रयः परमं च पवित्रं भवानेव कुत इत्यत आह
यतः शाश्वतं नित्यं पुरुषं तथा दिव्यं द्योतनात्मकं स्वप्रकाशं च आदिश्चासौ देवश्च तं देवानामादिभूत इत्यर्थः तथा अजं अजन्मानं विभुं व्यापकम् १२ त्वा
मेवाहुः के ऋषयः भृग्वादयः सर्वे देवर्षिर्नारदः असितश्च देवलश्च व्यासश्च स्वयं त्वमेव साक्षान्मे मह्यं ब्रवीषि १३ अतो मम इदानीं त्वदैश्वर्ये असंभावना-
निवृत्तेत्याह सर्वमिति एतद्रूवानेव परं ब्रह्मेत्यादि सर्वमपि ऋतं सत्यं मन्ये यन्मां प्रति त्वं कथयसि न मे विदुः सुरगणा इत्यादि तदपि सत्यमेव मन्य इत्याह

अर्जुन उवाच परं ब्रह्म परं धाम पवित्रं परमं भवान् पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् १२ आहुस्त्वामृषयः सर्वे
देवर्षिर्नारदस्तथा असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे १३ सर्वमेतदृतं मन्ये यन्मां वदसि केशव न हि ते भगवन्व्य
क्तिं विदुर्देवा न दानवाः १४ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते १५ नहीति हे भगवन्

न व्यक्तिं देवा न विदुः अस्मदनुग्रहार्थं प्रियमभिव्यक्तिरिति न जानन्ति दानवाश्चास्मन्निग्रहार्थमिति न विदुरेव १४ किं तर्हि स्वयमिति स्वयमेव त्वमे
वात्मानं वेत्थ जानासि नान्यः तदप्यात्मनास्वेनैव वेत्थ न साधनान्तरेणात्यादरेण बहुधा संबोधयति हे पुरुषोत्तम पुरुषोत्तमत्वे हेतुगर्भाणि संबोध
नानि हे भूतभावन भूतोत्पादक भूतानामीश नियन्तः देवानामादित्यादीनां देव प्रकाशक जगत्पते विश्वपालक १५ ७ ७ ७

यस्मात्तवाभिव्यक्तिंत्वमेववेत्सि नदेवादयस्तस्माद्वक्तुमर्हसीति याआत्मनस्तवदिव्याअत्यद्भुताविभूतयस्ताः सर्वावक्तुंत्वमेवार्हसि योग्योभ
वसि याभिरितिविभूतीनांविशेषणम् स्पष्टार्थम् १६ कथनप्रयोजनंदर्शयन्प्रार्थयते कथमितिद्वाभ्याम् हेयोगिन् कथंकैःविभूतिभेदैः
सदापरिचिंतयन्नहंत्वांविद्याम् जानीयाम् विभूतिभेदेनचिंत्योऽपित्वंकेषुकेषुपदार्थेषुमयाचिंतनीयोऽसि १७ तदेवंबहिर्मुखेऽपिचिन्तेतत्रत
त्रविभूतिभेदेनत्वच्चिंतैवयथाभवेत्तथाविस्तरेणकथयेत्याह विस्तरेणेति आत्मनस्तवयोगंसर्वज्ञत्वसर्वशक्तित्वादिलक्षणयोगैश्वर्यंविभू-

वक्तुमर्हस्यशेषेणदिव्याह्यात्मविभूतयः याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठसि १६ कथंविद्यामहंयोगिंस्त्वांस
दापरिचिंतयन् केषुकेषुचभावेषुचिंत्योऽसिभगवन्मया १७ विस्तरेणात्मकंयोगंविभूतिंचजनार्दन भूयःकथयतृ
प्तिर्हिशृण्वतोनास्तिमेऽमृतम् १८ श्रीभगवानुवाच हंततेकथयिष्यामिदिव्याह्यात्मविभूतयः प्राधान्यतः
कुरुश्रेष्ठनास्त्यंतोविस्तरस्यमे १९

तिंचविस्तरेणपुनःकथय हियस्मात्त्वद्वाक्यंअमृतरूपंशृण्वतोममतृप्तिः अलंबुद्धिर्नास्ति १८
एवंप्रार्थितःसन्श्रीभगवानुवाच हंतेति हंतेत्यनुकंपासंबोधनं दिव्याममयाविभूतयस्ताः प्राधान्येनतुभ्यंकथयिष्यामि यतोऽवांनरविभू
तिविस्तरस्यमदीयस्यांतोनास्ति अतःप्रधानभूताः कतिचिद्वर्णयिष्यामि १९

तत्रप्रथममैश्वरंरूपंकथयति अहमिति हेगुडाकेश सर्वेषांभूतानामाशयेषुसर्वज्ञत्वादिगुणैर्नियंतृत्वेनावस्थितः परमात्माऽहम् आदिर्जन्म मध्यं स्थितिः अंतः संहारः सर्वभूतानांजन्मादिहेतुश्चाहमित्यर्थः २० इदानींविभूतीः कथयति आदित्यानामित्यादिनायावदध्यायसमाप्ति आदित्यानांद्वादशानांमध्येविष्णुर्वामनोऽहम् ज्योतिषांप्रकाशानांमध्येंशुमान् विश्वव्यापकरश्मियुक्तोरविः सूर्योऽहम् मरुतांवायूनांमध्येमरीचिर्नामा

अहमात्मागुडाकेशसर्वभूताशयस्थितः अहमादिश्चमध्यंचभूतानामंतएवच २० आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी २१ वेदानांसामवेदोस्मिदेवानामस्मिवासवः इंद्रियाणांमनश्चास्मिभूतानामस्मिचेतना २२

हमस्मि यद्वा ससमरुद्गणादेवविशेषास्तेषांमध्यइति तेच आवहः प्रवहः विवहः परावहः उद्वहः संवहः परिवहइति मरुद्गणाः नक्षत्राणांमध्येचंद्रोऽहम् अत्रच आदित्यानामहंविष्णुरित्यादिषुप्रायशोनिर्धारणेषष्ठी क्वचिच्चभूतानामस्मिचेतनेत्यादिनासंबंधेषष्ठी तच्चतत्रतत्रैवदर्शयिष्यामः विष्णुरित्यादिष्ववतारेष्वपिप्रभावातिशयमात्रविवक्षयाविभूतित्वेननिर्दिश्यते अतःपरंचाध्यायस्यस्पष्टार्थत्वेऽपि क्वचित्किंचिद्व्याख्यास्यामः २१ वेदानामिति वासवइंद्रः भूतानांसंबंधिनीचेतनाज्ञानशक्तिरहमस्मि २२

रुद्राणामिति यक्षरक्षसामिति राक्षसानामपिक्रूरत्वादिसाम्याद्यक्षैः सहैकीकृत्यनिर्देशः तेषांमध्येवित्तेशः कुबेरोस्मि पावकोऽग्निः शिखरिणां शिखरवतामुच्छ्रितानांमेरुः २३ पुरोधसामिति पुरोधसांमध्येदेवपुरोहितत्वान्मुख्यंबृहस्पतिंमांविद्धि सेनानीनांमध्येदेवसेनापतिः स्कंदोऽहमस्मि सरसांस्थिरजलाशयानांमध्येसमुद्रोऽस्मि २४ महर्षीणामिति गिरांवाचांपदात्मिकानांमध्येएकमक्षरमोंकाराख्यंमदस्मि य

रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्षसाम् वसूनांपावकश्चास्मिमेरुःशिखरिणामहम् २३ पुरोधसांचमुख्यंमांविद्धि पार्थबृहस्पतिम् सेनानीनामहंस्कंदःसरसामस्मिसागरः २४ महर्षीणांभृगुरहंगिरामस्म्येकमक्षरम् यज्ञानांजपयज्ञोऽस्मिस्थावराणांहिमालयः २५ अश्वत्थःसर्ववृक्षाणांदेवर्षीणांचनारदः गंधर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः २६ उच्चैःश्रवसमश्वानांविद्धिमाममृतोद्भवम् ऐरावतंगजेंद्राणांनराणांचनराधिपम् २७

ज्ञानांश्रौतस्मार्त्तानांमध्येजपरूपोयज्ञोऽहम् २५ अश्वत्थइति देवाएवसंतोमंत्रदर्शनेनयेऋषित्वंप्राप्ताः तेषांमध्येनारदोऽस्मि सिद्धानांउत्पत्तितएवाधिगतपरमार्थानांकपिलाख्योमुनिरस्मि २६ उच्चैःश्रवसमिति अमृतार्थंक्षीराब्धिमंथनेउद्भूतमुच्चैःश्रवसंनामाश्वंमद्विभूतिंविद्धि अमृतोद्भवमित्येतदैरावतेऽपिसंबध्यते नराधिपंराजानंमांविद्धि २७ ॐ ॐ ॐ ॐ

आयुधानामिति आयुधानांमध्येवज्रम् कामान्दोग्धीतिकामधुक् प्रजनः प्रजोत्पत्तिहेतुः कंदर्पः कामोऽस्मि नकेवलंसंभोगप्रधानः कामोमद्विभू-
तिः अशास्त्रीयत्वात् सर्पाणांसविषाणांराजावासुकिरस्मि २८ अनंतइति नागानांनिर्विषाणांराजाअनंतः शेषोऽस्मि यादसांजलचराणांराजा
वरुणोऽस्मि पितॄणांराजाअर्यमाऽस्मि संयमतांनियमंकुर्वतांमध्येयमोऽस्मि २९ प्रल्हादइति कलयतांवशीकुर्वतांगणयतांवामध्येकालोऽ-
हम् मृगेंद्रः सिंहः ३० पवनइति पवतांपावयितॄणांवेगवतांवायुरस्मि शस्त्रभृतांवीराणांरामोदाशरथिः यद्वा परशुरामः झषाणांमत्स्या-

आयुधानामहंवज्रंधेनूनामस्मिकामधुक् प्रजनश्चास्मिकंदर्पःसर्पाणामस्मिवासुकिः २८ अनंतश्चास्मिनागानांवरुणो
यादसामहम् पितॄणामर्यमाचास्मियमःसंयमतामहम् २९ प्रल्हादश्चास्मिदैत्यानांकालःकलयतामहम् मृगाणांचमृ
गेंद्रोऽहंवैनतेयश्चपक्षिणाम् ३० पवनःपवतामस्मिरामःशस्त्रभृतामहम् झषाणांमकरश्चास्मिस्रोतसामस्मिजाह्न
वी ३१ सर्गाणामादिरंतश्चमध्यंचैवाहमर्जुन

नांमकरः मत्स्यविशेषस्तिमिंगिलः स्रोतसांप्रवाहो-
दकानांमध्येभागीरथी ३१ सर्गाणामिति सृज्यंतइतिसर्गाः आकाशादयः तेषामादिरंतश्चमध्यंचैवाहम् अहमादिश्चमध्यंचेत्यत्रसृष्ट्यादिक-
र्तृत्वंपारमैश्वर्यमुक्तम् अत्रतुउत्पत्तिस्थितिलयामद्विभूतित्वेनध्येयाइत्युच्यतेइतिविशेषः अध्यात्मविद्याआत्मविद्या प्रवदतांवादिनांसंबंधि- ६२

न्योवादजल्पवितंडाख्यास्तिस्रः कथाः प्रसिद्धाः तासांमध्येवादोऽहम् यत्रद्वाभ्यामपिप्रमाणतस्तर्कतश्चस्वपक्षः स्थाप्यते परपक्षः छलजातिनिग्रह
स्थानैर्दूष्यतेसजल्पोनाम यत्रत्वेकः स्वपक्षंस्थापयति अन्यस्तुछलजातिग्रहस्थानैस्तत्पक्षंदूषयति नतुस्वपक्षंसाधयतिसावितंडानामकथा तत्र
जल्पवितंडेविजिगीषमाणयोर्वादिनोः शक्तिपरीक्षामात्रफले वादस्तुवीतरागयोः शिष्याचार्ययोरन्ययोर्वातत्त्वनिर्णयफलश्चातोऽसौश्रेष्ठत्वान्म
द्विभूतिरित्यर्थः ३२ अक्षराणांवर्णानांमध्येअकारोऽस्मि तस्यसर्ववाङ्मयत्वेनश्रेष्ठत्वात् तथाचश्रुतिः अकारोहिसर्वावाक्सैषास्पर्शोष्मभिर्व्य

अध्यात्मविद्याविद्यानांवादःप्रवदतामहम् ३२ अक्षराणामकारोऽस्मिद्वंद्वःसामासिकस्यच अहमेवाक्षयःकालोधाताऽहं
विश्वतोमुखः ३३ मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्यताम् कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृतिःक्षमा ३४

ज्यमानाबह्वीनाना
रूपाभवतीति सामासिकस्यसमाससमूहस्यमध्येद्वंद्वः रामकृष्णावित्यादिसमासोऽस्मि उभयपदप्रधानत्वेनश्रेष्ठत्वात् अक्षयः प्रवाहरूपः कालोऽ
हमेव कालः कलयतामित्यत्रआयुर्गणनात्मकः संवत्सरशताद्यायुष्यरूपः कालउक्तः सचतस्मिन्नायुषिक्षीणेसतिक्षीयते अत्रतुप्रवाहात्मकः अक्षयः
कालउच्यतइतिविशेषः कर्मफलविधातृणांमध्येविश्वतोमुखोधाता सर्वकर्मफलविधाताऽहमित्यर्थः ३३ मृत्युरिति संहारकारिणांमध्येसर्वसंहर्ता
मृत्युरहम् भविष्यतांभाविकल्याणानांप्राणिनामुद्भवः अभ्युदयोऽहम् नारीणांस्त्रीणांमध्येकीर्त्याद्याः सप्तदेवतारूपाःस्त्रियोऽहम् यासामाभासमा
त्रयोगेनप्राणिनःश्लाघ्याभवंति ताःकीर्त्याद्याःस्त्रियोमद्विभूतीः ३४

मो॰ दा॰ ।।

बृहत्सामेति त्वामिद्धिहवामहइत्यस्यामृचिगीयमानंबृहत्सामतेनचेंद्रःसर्वैश्वरत्वेनस्तूयतइतिश्रैष्ठ्यंदर्शितम् छंदोविशिष्टानांमंत्राणांमध्येगायत्रीमंत्रोऽह
म् द्विजत्वापादकत्वेनसोमाहरणेनचश्रेष्ठत्वात् कुसुमाकरोवसंतः ३५ द्यूतमिति छलयतांमन्योन्यवंचनपराणांसंबंधिद्यूतमस्मि तेजस्विनांप्रभाववताम्
तांतेजः प्रभावोऽस्मि जेतॄणांजयोऽस्मि व्यवसायिनामुद्यमवतांव्यवसायोऽस्मि सत्त्ववतांसात्विकानांसत्वमहम् ३६ वृष्णीनामिति वासुदेवोयोऽहं
त्वामुपदिशामि धनंजयस्त्वमेवमद्विभूतिः मुनीनांवेदार्थमननशीलानांवेदव्यासोऽहमस्मि कवीनांकाव्यदर्शिनांमध्येउशनानामकविः शुक्रः ३७ दंड

बृहत्सामतथासाम्नांगायत्रीछंदसामहम् मासानांमार्गशीर्षोऽहमृतूनांकुसुमाकरः ३५ द्यूतंछलयतामस्मितेजस्तेजस्विनाम
हम् जयोऽस्मिव्यवसायोऽस्मिसत्वंसत्ववतामहम् ३६ वृष्णीनांवासुदेवोऽस्मिपांडवानांधनंजयः मुनीनामप्यहंव्यासःकवीनामु
शनाकविः ३७ दंडोदमयतामस्मिनीतिरस्मिजिगीषताम् मौनंचैवास्मिगुह्यानांज्ञानंज्ञानवतामहम् ३८ यच्चापिसर्वभूतानांबीजं
तदहमर्जुन नतदस्तिविनायत्स्यान्मयाभूतंचराचरम् ३९

सु क्रं १

इति दमयतांदमनकर्तॄणांसंबंधीदंडोऽस्मि येनअसंयताअपिसंयताभवंति सदंडोम
द्विभूतिः जेतुमिच्छतांसंबंधिनीसामाद्युपायरूपानीतिरस्मि गुह्यानांगोप्यानांगोपनहेतुर्मौनमवचनमहमस्मि नहितूष्णींस्थितस्याभिप्रायोज्ञायते ज्ञानवतां
तत्वज्ञानिनांयत्तज्ज्ञानंतदहम् ३८ यदिति यदपिचसर्वभूतानांबीजंप्ररोहकारणंतदहम् तत्रहेतुःमयाविनायत्स्यात् भवेत् तच्चराचरंभूतंनास्त्येवेति ३९

प्रकरणार्थमुपसंहरति नांतइति अनंतत्वाद्विभूतीनामतः साकल्येनवक्तुंनशक्यतइत्यर्थः एषतु विभूतेर्विस्तरः उद्देशतः संक्षेपतः प्रोक्तः ४० पुनश्च-
साकांक्षंप्रतिकथंचित्साकल्येनकथयति यद्यदिति विभूतिमत् ऐश्वर्ययुक्तम् श्रीमत् संपत्तियुक्तम् ऊर्जितंकेनचित्प्रभावबलादिनागुणे
नातिशयितंयद्यत्सत्वंवस्तुमात्रंतत्तदेवममतेजसः प्रभावस्यांशेनसंभूतंजानीहि ४१ अथवाकिमनेनपरिच्छिन्नज्ञानेनसर्वत्रमद्दृष्टिमेव
कुर्वित्याह अथवेति बहुनापृथक्पृथक्ज्ञानेनकिंकार्यम् यदिदंसर्वंजगत् एकांशेन एकदेशमात्रेणविष्टभ्यधृत्वा व्याप्येतिवा अहमेव-

नांतोऽस्तिममदिव्यानांविभूतीनांपरंतप एषतूद्देशतःप्रोक्तोविभूतेर्विस्तरोमया ४० यद्यद्विभूतिमत्सत्वंश्रीमदूर्जि
तमेववा तत्तदेवावगच्छत्वंममतेजोंऽशसंभवम् ४१ अथवाबहुनैतेनकिंज्ञातेनतवार्जुन विष्टभ्याहमिदंकृत्स्नमेकां
शेनस्थितोजगत् ४२ इतिश्रीमद्भग० विभूतियोगोनामदशमोऽध्यायः १०

स्थितः नमद्व्यतिरिक्तंकिंचिदस्ति पादोस्यविश्वाभूतानीतिश्रुतेः ४२ इंद्रियद्वारतश्चित्तेबहिर्धावतिसत्यपि ईशदृष्टिविधानाय
विभूतीर्दशमेऽब्रवीत् १ इतिसुबोधिन्यांटीकायांदशमोऽध्यायः १० ७ विभूतिवैभवंप्रोच्यकृपयापरयाहरिः दिदृ
क्षोरर्जुनस्याथविश्वरूपमदर्शयत् १ ७ ७ ७ ७ ७ ७

पूर्वाध्यायांतेविष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिविश्वात्मकंपारमेश्वरंरूपमुपक्षिसंतन् दिदृक्षुः पूर्वोक्तमभिनंदन्नर्जुनउवाच मदनुग्रहाये
तिचतुर्भिः ममानुग्रहायशोकनिवृत्तयेपरसंपरमार्थनिष्ठंगुह्यंगोप्यमपिअध्यात्ममितिसंज्ञितम् आत्मानात्मविवेकविषयंयत्त्वयोक्तंवचः अशोच्या
नन्वशोचस्त्वमित्यादिषष्ठाध्यायपर्यंतंयद्वाक्यंतेनममायंमोहोऽहंहंता एनेहन्यंतइत्यादिलक्षणोभ्रमोविगतः विनष्टः आत्मनः कर्तृत्वाद्यभावोक्तेः
१ किंच भवाप्ययाविति भूतानांभवाप्ययौसृष्टिप्रलयौत्वत्तःसकाशादेवभवतइतिश्रुतौमया अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथाइत्यादौवि

अर्जुनउवाच मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितम् यत्त्वयोक्तंवचस्तेनमोहोऽयंविगतोमम १ भवाप्ययौहिभू
तानांश्रुतौविस्तरशोमया त्वत्तःकमलपत्राक्षमाहात्म्यमपिचाव्ययम् २

स्तरशःपुनःपुनः कमलस्यपत्रेइवस्फुप्रसन्नेविशाले-
अक्षिणीयस्यसः· हेकमलपत्राक्षमाहात्म्यमपिचाव्ययम् श्रुतम् विश्वसृष्ट्यादिकर्तृत्वेऽपिशुभाशुभकर्मकारयितृत्वेऽपिबंधमोक्षादिविचित्रफल
दातृत्वेऽपिअविकारावैषम्यासंगोदासीन्यादिलक्षणमपरिमितंमहत्त्वंचश्रुतम् अव्यक्तंव्यक्तिमापन्नंमन्यंते मयाततमिदंसर्वंनचमांतानिकर्माणि
निबध्नंति समोऽहंसर्वभूतेषुइत्यादिना अतस्त्वत्परतंत्रत्वादपिजीवानामहंकर्तेत्यादिर्मदीयोमोहोविगतइतिभावः २ ७ ७

किंच एवमिति भवाप्ययौहिभूतानामित्यादिमयाश्रुतम् यथाचेदानीमात्मानंत्वमात्थ विष्टभ्याहमिदंकृत्स्नमित्येवंकथयसि हेपरमेश्वर एवमेतत् अत्राप्यविश्वासोममनास्तीत्यर्थः तथाऽपिहेपुरुषोत्तम तवैश्वरंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नंत्वद्रूपंकौतूहलादहंद्रष्टुमिच्छामि ३ नचाहंद्रष्टुमिच्छामीत्येतावतैवत्वयातद्रूपंदर्शयितव्यम् किंतर्हिमन्यसइति योगिनएवयोगास्तेषामीश्वर मयाअर्जुनेनतद्रूपंद्रष्टुंशक्यंयदिमन्यसे ततस्तर्हितद्रूपवंतमात्मानंअव्ययंनित्यंममदर्शय ४ एवंप्रार्थितःसन् अत्यद्भुतंरूपंदर्शयिष्यन्सावधानोभवेत्येवमर्जुनमभिमुखीकरोति

एवमेतद्यथात्थत्वमात्मानंपरमेश्वर द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम ३ मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो यो
गेश्वरततोमेत्वंदर्शयात्मानमव्ययम् ४ श्रीभगवानुवाच पश्यमेपार्थरूपाणिशतशोथसहस्रशः नानाविधा
निदिव्यानिनानावर्णाकृतीनिच ५ पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा बहून्यदृष्टपूर्वाणिपश्याश्चर्याणिभारत ६

श्रीभगवानुवाच पश्येतिचतुर्भिः रूपस्यैकत्वेऽपिनानाविधत्वाद्रूपाणीतिबहुवचनम् अपरिमितान्यनेकप्रकाराणि अलौकिकानिममरूपाणिपश्य वर्णाःशुक्लकृष्णादयः आकृतयोऽवयवसन्निवेशविशेषाः नानाअनेकवर्णाः आकृतयश्चयेषांतानिनानावर्णाकृतीनि ५ तान्येवाह पश्येति आदित्यादीन्ममदेहेपश्य मरुतएकोनपंचाशद्देवविशेषाः अदृष्टपूर्वाणि त्वयावाअन्येनवापूर्वम दृष्टानिरूपाणिआश्चर्याणिअत्यद्भुतानि ६ ६७

किंच इहेति तत्रतत्रपरिभ्रमता वर्षकोटिभिरपिद्रष्टुमशक्यंकृत्स्नमपिचराचरसहितंजगत् इहास्मिन्ममदेहे अवयवरूपेणैकत्रैवस्थितमद्याधुनैवप
श्य यच्चान्यज्जगत् आश्रयभूतंकारणस्वरूपम् जगतश्चावस्थाविशेषादिकम् जयपराजयादिकंचयदप्यन्यत् द्रष्टुमिच्छसितत्सर्वंपश्य ७ यदुक्त
मर्जुनेनमन्यसेयदितच्छक्यमितितत्राह नत्विति अनेनैवतुस्वीयेनचर्मचक्षुषामांद्रष्टुंनशक्यसे शक्तोनभविष्यसि अतोऽहंदिव्यमलौकिकंज्ञाना
त्मकंचक्षुस्तुभ्यंददामि ममैश्वरमसाधारणंयोगंयुक्तिमघटितघटनासामर्थ्यंपश्य ८ एवमुक्त्वाभगवानर्जुनायरूपंदर्शितवान् तच्चरूपंहस्त्वाऽर्जु

इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरम् ममदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ७ नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा दि
व्यंददामितेचक्षुःपश्यमेयोगमैश्वरम् ८ संजयउवाच एवमुक्त्वाततोराजन्महायोगेश्वरोहरिः दर्शयामासपार्थायपरमंरूप
मैश्वरम् ९ अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् अनेकदिव्याभरणंदिव्यानेकोद्यतायुधम् १०

नः श्रीकृष्णंविज्ञापितवान् इतीममर्थमेवमुक्त्वेत्यादिभिः षड्भिःश्लोकैः धृतराष्ट्रंप्रतिसंजयउवाच हेराजन् धृतराष्ट्र महांश्चासौयोगेश्वरश्चहरिः परमं
ऐश्वरंरूपंदर्शितवान् ९ कथंभूतंतदित्यतआह अनेकेति अनेकानिवक्त्राणिनयनानिचयस्मिन्तत् अनेकानामद्भुतानांदर्शनंयस्मिन्तत् अने-
कानिदिव्याभरणानियस्मिन्तत् दिव्यान्यनेकानिउद्यतानिआयुधानिचयस्मिन्तत् १० ७ ७ ७ ७ ६५

किंच दिव्येति दिव्यानिमाल्यांबराणिधारयतीनितथा दिव्योगंधोयस्यतादृशमनुलेपनंयस्यतत् सर्वाश्चर्यमयमनेकाश्चर्यप्रायम् देवंद्योतनात्मक
म् अनंतमपरिच्छिन्नम् विश्वतःसर्वतोमुखानियस्मिन्तत् ११ विश्वरूपदीप्तेःनिरुपमत्वमाह दिवीति दिविआकाशेसूर्यसहस्रस्ययुगपदुत्थि
तस्ययदियुगपदुत्थिताभाःप्रभाभवेत् तर्हिसातदामहात्मनोविश्वरूपस्यभासः प्रभायाः कथंचित्सदृशीस्यात् नान्योपमास्तीत्यर्थः तथाभूतं
रूपंदर्शयामासेतिपूर्वेणान्वयः १२ ततःकिंवृत्तमित्यपेक्षायामाहसंजयः तत्रेति अनेकधाप्रविभक्तंनानाविभागेनावस्थितंकृत्स्नंजगद्देवदेव

दिव्यमाल्यांबरधरंदिव्यगंधानुलेपनम् सर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखम् ११ दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता य
दिभाःसदृशीसास्याद्भासस्तस्यमहात्मनः १२ तत्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा अपश्यद्देवदेवस्यशरीरेपांडवस्त
दा १३ ततःसविस्मयाविष्टोहृष्टरोमाधनंजयः प्रणम्यशिरसादेवंकृतांजलिरभाषत १४ अर्जुनउवाच पश्यामिदे
वांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान्

स्यशरीरेतदवयवत्वेनैकत्रैवस्थितंतदापांडवोऽर्जुनोऽपश्यत् १३ एवंदृष्ट्वाकिंकृतवानि
त्यतआह ततइति ततोदर्शनानंतरंविस्मयेनाविष्टोव्याप्तः सन्हृष्टानिउत्पुलकितानिरोमाणियस्यसधनंजयोदेवंतमेवशिरसाप्रणम्यकृतांजलिः
संपुटीकृतहस्तोभूत्वाअभाषत उक्तवान् १४ भाषणमेवाह पश्यामीतिसप्तदशभिः हेदेवतवदेहेदेवान् आदित्यादीन्पश्यामि तथासर्वान्भूत-

विशेषाणांजरायुजांडजादीनांसंघांश्च तथादिव्यानृषीन्वसिष्ठादीन् उरगांश्चतक्षकादीन् तथादेवानामीशंस्वामिनंब्रह्माणंच कथंभूतम् कमलास
नस्थम् पृथ्वीपद्मकर्णिकायांमेरौस्थितम् यद्वा त्वन्नाभिपद्मासनस्थम् १५ किंच अनेकेति अनेकानिबाह्वादीनियस्यतादृशंपश्यामि अनंतानिरूपाणियस्य
तंत्वांसर्वतः पश्यामि नतु अंतंमध्यं आदिंचनपश्यामि सर्वगतत्वात् १६ किंच किरीटिनमिति किरीटिनंमुकुटवंतंच गदिनंगदावंतंच चक्रिणंचक्रवंतंच स

ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान् १५ अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोऽनंतरूपम् नांतंनम
ध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपम् १६ किरीटिनंगदिनंचक्रिणंचतेजोराशिंसर्वतोदीप्तिमंतम् पश्यामित्वांदुर्निरीक्ष्यं
समंताद्दीप्तानलार्कद्युतिमप्रमेयम् १७ त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यपरंनिधानम् त्वमव्ययःशाश्वतधर्मगोप्तासनातन
स्त्वंपुरुषोमतोमे १८

र्वतोदीप्तिमंतं-
तेजःपुंजरूपम् तथादुर्निरीक्ष्यंद्रष्टुमशक्यम् तत्रहेतुः दीप्तयोरनलार्कयोर्द्युतिरिवद्युतिस्तेजोयस्यतम् अतएवाप्रमेयम् एवंभूतइतिनिश्चेतुमशक्यम् त्वां
समंततः पश्यामि १७ यस्मादेवंतवातर्क्यमैश्वर्यंतस्मात् त्वमिति त्वमेवाक्षरंपरमंब्रह्मकथंभूतंवेदितव्यंमुमुक्षुभिर्ज्ञातव्यम् त्वमेवास्यविश्वस्यपरंनिधानम्नि
धीयतेऽस्मिन्निनिनिधानंप्रकृष्टमाश्रयः अतएवत्वंअव्ययःनित्यःशाश्वतस्यनित्यस्यधर्मस्यगोप्तापालकःसनातनःचिरंतनःपुरुषोममसंमतोऽसि १८

किंच अनादीति अनादिमध्यांतंउत्पत्तिस्थितिप्रलयरहितम् अनंतंवीर्यंप्रभावोयस्यतम् अनंतबाहुंअनंताःवीर्यवंतोबाहवोयस्यतम् शशिसूर्यौनेत्रेय-
स्यतम् नाहशंत्वांपश्यामि तथादीसोहुताशोवक्रेषुयस्यतम् स्वतेजसाइदंविश्वंतपंतंसंतापयंतंपश्यामि १९ किंच द्यावापृथिव्योरिति द्यावापृथिव्यो
रिदमतरंहि अंतरिक्षंत्वयैकेनव्यासम् दिशश्चसर्वाः व्यासाः अद्भुतंअदृष्टपूर्वंत्वदीयमिदमुग्रंघोरंरूपंदृष्ट्वालोकत्रयंप्रव्यथितंअतिभीतंपश्यामिइतिपूर्व
स्यैवानुषंगः २० किंच अमीहीति अमीसुरसंघाः भीताःसंतः त्वांविशंतिशरणंप्रविशंति तेषांमध्येकेचिदतिभीताः दूरतएवस्थित्वाकृतसंपुटकरयुग

अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रम् पश्यामित्वांदीसहुताशवक्रंस्वतेजसाविश्वमिदंतपंतम् १९ द्यावापृथि
व्योरिदमंतरंहिव्यासंत्वयैकेनदिशश्चसर्वाः दृष्ट्वाऽद्भुतंरूपमुग्रंतवेदंलोकत्रयंप्रव्यथितंमहात्मन् २० अमीहित्वांसुरसंघावि
शंतिकेचिद्भीताःप्रांजलयोगृणंति स्वस्तीत्युक्त्वामहर्षिसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः २१ रुद्रादित्यावसवोयेच
साध्याविश्वेऽश्विनौमरुतश्चोष्मपाश्च

लाःसंतोगृणंति जयजयरक्षरक्षेतिप्रार्थयंते स्पष्टमन्यत् २१ किंच रुद्रेति रुद्राश्चादित्या
श्चवसवश्चयेचसाध्यानामदेवाः विश्वदेवाः अश्विनौदेवौमरुतोमरुद्गणाः ऊष्माणंपिबंतीत्यूष्मपाःपितरः उष्मभागाहिपितरइत्यादिश्रुतेः स्मृ
तिश्च यावदुष्णंभवेदन्नंयावदश्नंतिवाग्यताः पितरस्तावदश्नंतियावन्नोक्ताहविर्गुणाइति गंधर्वाश्चयक्षाश्चासुराश्चविरोचनादयः सिद्धानांसं-

घाश्चनेसर्वएवहिविस्मिताःसंतः त्वांवीक्षंतइत्यन्वयः २२ किंच रूपमिति हेमहाबाहो महत्अत्यूर्जितंतवरूपंदृष्ट्वालोकाः सर्वेप्रव्यथिताः अतिभीताः तथा
अहंप्रव्यथितोऽस्मि कीदृशंरूपंदृष्ट्वा बहूनिवक्त्राणिनेत्राणिचयस्मिन्तत् बहवोबाहवऊरवःपादाश्चयस्मिन्तत् बहूनिउदराणियस्मिन्तत् बहुभिःदं
ष्ट्राभिः करालंविकृतंरौद्रमित्यर्थः २३ नकेवलंभीतोऽहमित्येवंतावदेवअपितुनभःस्पृशमिति नभःस्पृशतीतिनभःस्पृक् तंअंतरिक्षव्यापिनमित्यर्थः

गंधर्वयक्षासुरसिद्धसंघावीक्षंतेत्वांविस्मिताश्चैवसर्वे २२ रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादम् बहूदरंबहुदंष्ट्रा
करालंदृष्ट्वालोकाःप्रव्यथितास्तथाऽहम् २३ नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रम् दृष्ट्वाहित्वांप्रव्यथि
तांतरात्माधृतिंनविंदामिशमंचविष्णो २४ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानलसन्निभानि दिशोनजानेनलभेच
शर्मप्रसीददेवेशजगन्निवास २५

दीप्तंतेजोयुक्तम् अनेकेवर्णाःयस्यतमनेकवर्णम् व्यात्तानिविवृतानिआननानियस्यतम् दीप्तानिविशा
लानिनेत्राणियस्यतम् एवंभूतंत्वांदृष्ट्वाप्रव्यथितअंतरात्मामनोयस्यसोऽहम् धृतिंधैर्यंउपशमंचनलभे २४ किंच दंष्ट्रेति भोदेवेशतवमुखानिदृष्ट्वाभ ६७
यावेशेनदिशोनजानामि शर्मचसुखंनलभे भोजगन्निवास प्रसन्नोभव कीदृशानि मुखानि दंष्ट्राभिःकरालानि कालानलःप्रलयाग्निः तत्सदृशानि २५

यच्चान्यद्द्रष्टुमिच्छसीत्यनेनास्मिन् संग्रामेभाविजयपराजयादिकंचममदेहेपश्येति यद्भगवतोक्तंतदिदानींपश्यन्नाह अमीचेतिपंचभिः अमीधृतरा
ष्ट्रस्यपुत्राः दुर्योधनादयः सर्वेअवनिपालानांजयद्रथादीनांराज्ञांसंघैः सहैवतववक्त्राणिविशंतीत्युत्तरेणान्वयः तथाभीष्मश्चद्रोणश्चासौसूतपुत्र
कर्णश्च नकेवलंतएवविशंतिअपितुप्रतियोद्धारोयेऽस्मदीयायोधमुख्याः शिखंडीधृष्टद्युम्नादयः तैःसह २६ वक्त्राणीति एतेसर्वेत्वरमाणाः धावं
तइवदंष्ट्राभिः विकृतानिभयंकराणिवक्त्राणिविशंति तेषांमध्येकेचिच्चूर्णीकृतैः शिरोभिः उपलक्षिताः दंतसंधिषुसंश्लिष्टादृश्यंते २७ प्रवेशमेव

अमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनिपालसंघैः भीष्मोद्रोणःसूतपुत्रस्तथाऽसौसहास्मदीयैरपियोधमुख्यैः २६ वक्त्रा
णितेत्वरमाणाविशंतिदंष्ट्राकरालानिभयानकानि केचिद्विलग्नादशनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः २७ यथानदीनांबहवों
बुवेगाःसमुद्रमेवाभिमुखाद्रवंति तथातवामीनरलोकवीराविशंतिवक्त्राण्यभिविज्वलंति २८ यथाप्रदीप्तंज्वलनंपतंगाविशं
तिनाशायसमृद्धवेगाः तथैवनाशायविशंतिलोकास्तवापिवक्त्राणिसमृद्धवेगाः २९

दृष्टांतेनाह यथेति नदीनामनेकमार्गप्रवृत्तानांबह
वः अंबूनांवारिणांवेगाः प्रवाहाः समुद्राभिमुखाः संतोयथासमुद्रमेवद्रवंति प्रविशंति तथाअमीयेनरलोकवीराः तेअभिविज्वलंति सर्वतःप्रदीप्यमाना
निवक्त्राणिप्रविशंति २८ अवशत्वेनप्रवेशेनदीवेगोदृष्टांतउक्तः बुद्धिपूर्वकप्रवेशेदृष्टांतमाह यथेति प्रदीप्तंज्वलनमग्निंपतंगाःसूक्ष्मपक्षिविशेषाः बुद्धिपू
र्वकंसमृद्धोवेगोयेषांतेयथानाशायमरणायैवविशंति तथैवलोकाएतेजनाश्चापितवमुखानिप्रविशंति २९

ततः किमत आह ग्रसमानो गिलन् समग्रान् लोकान् सर्वान् नेनान्वीरान् आसमंतात् सर्वतो लेलिह्यसे अतिशयेन भक्षयसि कैः ज्वलद्भिर्वदनैः किंच हे विष्णो तव भासो दीप्तयस्तेजोभिः विस्फुरणैः समस्तं जगद्व्याप्य तीव्राः सत्यः प्रतपंति संतापयंति ३० यत एवं तस्मादाख्याहीति भवानुग्ररूपः कइत्याख्याहि कथ यतु भ्यं नमोऽस्तु हे देववर प्रसन्नो भव भवंतमाद्यं पुरुषं विशेषेण ज्ञातुमिच्छामि यतस्तव प्रवृत्तिं चेष्टां किमर्थमेवं प्रवृत्तोऽसीति न जानामि एवंभूतस्यत

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३० आख्याहि मे कोभवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ३१ श्रीभगवानुवाच का लोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्त्तुमिह प्रवृत्तः ऋतेऽपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ३२

व प्रवृत्तिं वार्त्तामपि न जानामीति वा ३१ एवं प्रार्थितः सन् श्रीभगवानुवाच कालोऽस्मीति त्रिभिः लोकानां क्षयकर्त्ता प्रवृद्धो अत्युग्रः कालोऽस्मि लोकान्प्राणि नः संहर्त्तुमिह प्रवृत्तोऽस्मि अतः ऋतेऽपि त्वां इति त्वां हं तारं विनाऽपि न भविष्यंति न जीविष्यंति यद्यपि त्वया न हंतव्या एते तथाऽपि मया कालात्मना ग्रस्ताः संतो मरिष्यंत्येव के ते प्रत्यनीकेषु अनीकान्यनीकानि प्रति भीष्मद्रोणादीनां सर्वासु सेनासु ये योद्धारोऽवस्थितास्ते सर्वेऽपि ३२ ६७

यस्मादेवं तस्मादिति तस्मात्त्वं युद्धायोत्तिष्ठ देवैरपि दुर्जयाः भीष्मद्रोणादयोऽर्जुनेन निर्जिता इति एवंभूतं यशो लभस्व प्राप्नुहि अयत्नेन शत्रून् जित्वा स
मृद्धं राज्यं भुंक्ष्व एते च तव शत्रवः त्वदीययुद्धात्पूर्वमेव मयैव कालात्मना निहतप्रायाः तथाऽपि त्वं निमित्तमात्रं भव हे सव्यसाचिन् सव्येन वामहस्तेन
साचितुं संधातुं शीलं यस्येति व्युत्पत्त्या वामेनापि बाणक्षेपात् सव्यसाचीत्युच्यते ३३ न चैतद्विद्मः कतरन्नो गरीय इत्यादि शंका साऽपि न कार्येत्याह

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धम् मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ३३
द्रोणं च भीष्मं च जयद्रथं च कर्णं तथाऽन्यानपि योधवीरान् मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेताऽसि रणे सपत्नान् ३४
संजय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५

द्रोणं चेति येभ्यस्त्वं शंकसे तान् द्रोणादीन्मयैव हतान् त्वं जहि घातय मा व्यथिष्ठाः शोकं माकार्षीः सपत्नान् शत्रून् रणे युद्धे निश्चितं जेताऽसि जेष्यसि ३४ ततो य
द्वृत्तं तद्धृतराष्ट्रं प्रति संजय उवाच एतदिति एतत्पूर्वश्लोकत्रयात्मकं केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः किरीटी अर्जुनः कृतांजलिः संपुटीकृतहस्तः कृष्णं
नमस्कृत्य पुनरप्याह उक्तवान् कथमाह भयहर्षाद्यावेशात् गद्गदेन कंठकंपनेन सह वर्त्तत इति सगद्गदं यथा भवति तथा किंच भीतादपि भीतः सन् प्रणम्य अवनतो भूत्वा
३५

स्थानइत्येकादशभिरर्जुनस्योक्तिः स्थानइत्यव्ययंयुक्तमित्यस्मिन्नर्थे हेहृषीकेश यतएवंत्वमद्भुतप्रभावोभक्तवत्सलश्च अतस्तवप्रकीर्त्यामाहात्म्यसंकीर्त्तनेनननकेव
लमहमेवप्रहृष्यामि किंतु जगत्सर्वंप्रहृष्यति प्रकर्षेणहर्षंप्राप्नोति एतत्तुस्थानेयुक्तमित्यर्थः तथाजगत् अनुरज्यते अनुरागंचोपैतिइतियत् तथारक्षांसिभीतानिसं
तिदिशः प्रतिद्रवंतिपलायंतइतियत् सर्वेयोगतपोमंत्रादिसिद्धानांसंघानमस्यंति प्रणमंतिइतियत् एतच्चस्थानेयुक्तमेव नचित्रमित्यर्थः ३६ तत्रहेतुमाह क
स्मादिति हेमहात्मन् हेअनंत हेदेवेश हेजगन्निवास कस्माद्धेतोस्तेतुभ्यंनननमेरन् नमस्कारंनकुर्युः कथंभूताय ब्रह्मणोऽपिगरीयसेगुरुतराय आदिकर्त्रेचब्र

अर्जुनउवाच स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच रक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ३६ क
स्माच्चतेनननमेरन्महात्मन्गरीयसेब्रह्मणोऽप्यादिकर्त्रे अनंतदेवेशजगन्निवासत्वमक्षरंसदसत्तत्परंयत् ३७ त्वमादिदेवःपुरुषःपुराण
स्त्वमस्यविश्वस्यपरंनिधानम् वेत्ताऽसिवेद्यंचपरंचधामत्वयाततंविश्वमनंतरूप ३८

ह्मणोऽपिजनकाय किंच सत्व्यक्तंअसत् अव्यक्तंच ता
भ्यांपरंमूलकारणंयदक्षरंब्रह्मतच्चत्वमेव एतैर्नवभिर्हेतुभिस्त्वांसर्वेनमस्यंतीतिनचित्रमित्यर्थः ३७ किंच त्वमिति त्वमादिदेवः देवानामादिः
यतः पुराणः अनादिः आदिपुरुषस्त्वम् अतएवत्वमस्यविश्वस्यपरंनिधानम् लयस्थानम् तथाविश्वस्यवेत्तावेदिताज्ञाताचत्वम् यच्चवेद्यंवस्तुजा
तंपरंचधामवैष्णवंपदंतदपित्वमेवासि अतएव अनंतरूपत्वयैवविश्वमिदंततंव्याप्तम् एतैश्चसप्तभिर्हेतुभिः त्वमेवनमस्कार्यइतिभावः ३८

मायां १

गर्जन२

इतश्चत्वमेवसर्वैर्नमस्कार्यः सर्वदेवात्मकत्वादितिस्तुवन्स्वयमपिनमस्करोति वायुरिति वाय्वादिरूपस्त्वमिति सर्वदेवतात्मकत्वोपलक्षणार्थमुक्तम् प्र जापतिः पितामहः तस्यापिजनकत्वात् प्रपितामहस्त्वमतस्तेतुभ्यंसहस्रकृत्वः सहस्रशोनमोऽस्तु भूयोऽपिपुनरपिसहस्रकृत्वोनमोनमइति भक्तिश्र द्धाभरातिरेकेणनमस्कारेषुतृप्तिमनधिगच्छन्बहुशःप्रणमति ३९ किंच नमइति हेसर्वसर्वात्मन्सर्वास्वपिदिक्षुतुभ्यंनमोस्तु सर्वात्मकत्वमुपपाद यन्नाह अनंतंवीर्यंसामर्थ्यंयस्यतथापि अमितोविक्रमः पराक्रमोयस्यसएवंभूतः त्वंसर्वंविश्वंसम्यगंतर्बहिश्चसमाप्नोषि व्याप्नोषि स्रुवर्णमिवक

वायुर्यमोऽग्निर्वरुणःशशांकःप्रजापतिस्त्वंप्रपितामहश्च नमोनमस्तेस्तुसहस्रकृत्वःपुनश्चभूयोऽपिनमोनमस्ते ३९ नमःपुरस्ता दथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व अनंतवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषिततोऽसिसर्वः ४० सखेतिमत्वाप्रसभंयदुक्तंहे कृष्णहेयादवहेसखेति अजानतामहिमानंतवेदंमयाप्रमादात्प्रणयेनवाऽपि ४१ यच्चावहासार्थमसत्कृतोसिविहारशय्याऽसनभो जनेषु

टककुंडलादिस्वकार्यंव्याप्यवर्त्तते ततःसर्वरूपोऽसि ४० इदानींभगवंतंक्षमापयति सखेतिद्वाभ्याम् त्वांप्राकृतः सखेतिमत्वाप्रसभंहठेन तिरस्कारेणयदुक्तंतत्क्षामयेत्वामित्युत्तरेणान्वयः किंतत् हेकृष्णहेयादवहेसखे संधिरार्षः प्रसभोक्तौहेतुः तवमहिमानमिदंचविश्वरूपमजानतामया प्रमादात्प्रणयेनस्नेहेनापिचायदुक्तमिति ४१ किंच यच्चेतिहे अच्युत यच्चपरिहासार्थंक्रीडादिषुतिरस्कृतोऽसि एकः एकलः सखीन्विनारहसिस्थित इत्यर्थः

अथवानत्समक्षंतेषांपरिहसनांसखीनांसमक्षंपुरतोऽपि तत्सर्वमपराधजातंत्वांअप्रमेयमचिंत्यप्रभावंक्षामये क्षमांकारयामि ४२ अचिंत्यप्रभा
वमेवाह पितेति नविद्यतेप्रतिमाउपमायस्यसः अप्रतिमः तथाविधः प्रभावोयस्यतवहे अप्रतिमप्रभाव त्वमस्यचराचरस्यपिताजनकोऽसि अत
एवपूज्यश्च गुरुश्चगुरोरपिगरीयान् गुरुतरः अतःलोकत्रयेपित्वत्समएवतावदन्योनास्ति परमेश्वरस्यान्यस्याभावात् त्वत्तोभ्यधिकःपुनःकुतःस्या

एकोथवाप्यच्युततत्समक्षंतत्क्षामयेत्वामहमप्रमेयम् ४२ पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्गरीयान् नत्वत्स
मोऽस्त्यभ्यधिकःकुतोऽन्योलोकत्रयेप्यप्रतिमप्रभाव ४३ तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्वामहमीशमीड्यम् पितेवपु
त्रस्यसखेवसख्युःप्रियःप्रियायार्हसिदेवसोढुम् ४४ अदृष्टपूर्वंहृषितोऽस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे तदेवमेदर्शयदे
वरूपंप्रसीददेवेशजगन्निवास ४५

त् ४३ यस्मादेवंतस्मादिति तथात्वामीशंजगतः स्वामिनंईड्यंस्तुत्यंप्रसादये प्रसादयामि क
थंकायंप्रणिधायदंडवन्निपात्यप्रणम्यनत्वा अतस्त्वंममापराधंसोढुंक्षंतुमर्हसि कस्यकइव पुत्रस्यापराधंकृपयापितायथासहते सख्युर्मित्रस्याप
राधंसखानिरुपाधिबंधुर्यथा प्रियश्चप्रियायाअपराधंतस्त्रियार्थंयथातद्वत् ४४ एवंक्षमापयित्वाप्रार्थयते अदृष्टपूर्वमितिद्वाभ्याम् हेदेवपूर्वमदृ
ष्टंतवरूपंदृष्ट्वाहृषितोऽस्मि तथाभयेनचमेमनः प्रव्यथितंप्रचलितम् तस्मात्ममव्यथा निवृत्तयेतदेवरूपंदर्शय हेदेवेशप्रसन्नोभव ४५

तदेवरूपंविशेषयन्नाह किरीटिनमिति किरीटिनंचगदावंतंचक्रहस्तंत्वांद्रष्टुमिच्छामि पूर्वंयथादृष्टोऽसितथैव अतोहेसहस्रबाहोविश्वमूर्त्तइदं
विश्वरूपंसंहृत्यतेनैवकिरीटादियुक्तेनचतुर्भुजेनरूपेणभव आविर्भव तदनेनश्रीकृष्णमर्जुनः पूर्वमपिकिरीटादियुक्तमेवपश्यतीतिगम्यते यत्तु
पूर्वमुक्तंविश्वरूपदर्शनेकिरीटिनंगदिनंचक्रिणंचपश्यामीतितत्तत् बहुकिरीटाद्यभिप्रायेण यद्वा एतावंतंकालंयंत्वांकिरीटिनंचक्रिणंचसुप्रसन्नमपश्यं
नमेवइदानींतेजोराशिंदुर्निरीक्ष्यंपश्यामीत्येवंतत्रबहुवचनव्यक्तिरित्यविरोधः ४६ एवंप्रार्थितःसन्तमाश्वासयन्श्रीभगवानुवाच मयेतित्रिभिः

किरीटिनंगदिनंच कहस्तमिच्छामित्वांद्रष्टुमहंतथैव तेनैवरूपेण चतुर्भुजेनसहस्रबाहोभवविश्वमूर्ते ४६ श्रीभगवानुवा-
च मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात् तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्वं ४७ नवेदयज्ञाध्यय
नैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः एवंरूपःशक्यअहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवीर ४८ हेअर्जुनकिमितिबिभेषि यतोमयाप्रसन्नेन
कृपयानवेदंपरमंउत्तमंरूपंदर्शितम् आत्मनोममयोगाद्योगमायासामर्थ्यात् परत्वमेवाह तेजोमयंविश्वंविश्वात्मकमनंतं आद्यंचयत् ममरूपंत्वदन्येन
त्वादृशाद्भक्तादन्येननपूर्वंदृष्टंतत् ४७ एतद्दर्शनमतिदुर्लभंलब्ध्वात्वंकृतार्थोऽसीत्याह नेति वेदाध्ययनातिरेकेणयज्ञाध्ययनस्याभावात् यज्ञशब्देनयज्ञ
विद्याःकल्पसूत्राद्यालक्ष्यंतेवेदानांयज्ञविद्यानांवाऽध्ययनैरित्यर्थः नचदानैर्नचक्रियाभिरग्निहोत्रादिभिः नचोग्रैस्तपोभिश्चांद्रायणादिभिः एवंरूपोऽहंत्व
दन्येनमनुष्यलोकेद्रष्टुमशक्यः अपितुत्वमेवकेवलंमत्प्रसादेनदृष्टवान्कृतार्थोऽसि ४८ ७

एवमपिचेत्तवेदंरूपंघोरंदृष्ट्वाव्यथाभवतितर्हितदेवरूपंदर्शयामीत्याह मानइति ईदृक्ईदृशंमदीयंघोरंरूपंदृष्ट्वातेव्यथामास्तु विमूढभावोविमूढत्वंचमा स्तु व्यपगतभयः प्रीतमनाश्चसन्पुनस्त्वंतदेवेदंममरूपंप्रकर्षेणपश्य ४९ एवमुक्त्वाप्राक्तनमेवरूपंदर्शितवानितिसंजयउवाचेतीति श्रीवासुदेवोऽर्जुन मेवमुक्त्वायथापूर्वमासीत्तथैवकिरीटादियुक्तंचतुर्भुजंस्वीयंरूपंपुनर्दर्शयामास एनमर्जुनंभीतमेवप्रसन्नवपुर्भूत्वापुनरप्याश्वासितवान् महात्माविश्व

मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमीदृङ्ममेदम् व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूपमिदंप्रपश्य ४९ संजयउ वाच इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंदर्शयामासभूयः आश्वासयामासचभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा ५० अर्जुनउवाच दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन इदानीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः ५१ श्रीभगवानुवाच सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः ५२ नाहंवेदैर्नतपसानदानेननचेज्यया शक्य एवंविधोद्रष्टुंदृष्टवानसिमांयथा ५३

रूपःकृपालुरितिवा ५० ततोनिर्भयःसन्नर्जुनउवाच दृष्ट्वेति सचेताःप्रसन्नचित्तइदानींसंवृत्तः जातोऽस्मि प्रकृतिंस्वास्थ्यंचप्राप्तोऽस्मि शेषंस्पष्टम् ५१ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् श्रीभगवानुवाच सुदुर्दर्शमिति यन्ममविश्वरूपंत्वंदृष्ट- वानसि इदंसुदुर्दर्शमत्यंतंद्रष्टुमशक्यम् यतोदेवा अप्यस्यरूपस्यसर्वदादर्शनमिच्छंति नकेवलंपुनरिदंपश्यंति ५२ तत्रहेतुः नाहमितिस्पष्टार्थः ५३

केनोपायेनतर्हिद्रष्टुंशक्यइतितत्राह भक्त्येति अनन्ययामदेकनिष्ठयाभक्त्यातुएवंभूतोविश्वरूपोऽहंतत्त्वेनपरमार्थतः ज्ञातुंशक्यः शास्त्रतः द्रष्टुंचप्रत्यक्षतः प्रवेष्टुंचतादात्म्येनशक्यः नान्यैरुपायैः ५४ अतःसर्वशास्त्रसारंपरमंरहस्यंशृण्वित्याह मत्कर्मकृदिति मदर्थंकर्मकरोतीतिमत्कर्मकृत् अहमेवपरमः पुरुषार्थोयस्यसः ममैवभक्तिमाश्रितः पुत्रादिषुसंगवर्जितः निर्वैरश्चसर्वभूतेषु एवंभूतोयः समांप्राप्नोति नान्यइति ५५ देवैरपिसुदुर्दर्शनपोज्ञानादिकोटिभिः भक्तायभगवानेवंविश्वरूपमदर्शयत् १ इतिसुबोधिन्यांटीकायामेकादशोऽध्यायः ११ निर्गुणोपासनस्यैवंसगुणोपासनस्यच श्रेयःक

भक्त्यात्वनन्ययाशक्यअहमेवंविधोऽर्जुन ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतप ५४ मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः निर्वैरः सर्वभूतेषुयःसमामेतिपांडव ५५ इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविश्वरूपदर्शनयोगोनामएकादशोऽध्यायः ११ अर्जुनउवाच एवंसततयुक्तायेभक्तास्त्वांपर्युपासते येचाप्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः १

तरदित्येवंनिर्णेतुंद्वादशोद्यमः १ पूर्वाध्यायांतेमत्कर्मकृन्मत्परमइत्येवंभक्तिनिष्ठस्यश्रेष्ठत्वमुक्तम् कौंतेयप्रतिजानीहीत्यादिनातत्रतत्रस्यैवश्रेष्ठत्वंवर्णितम् तथातेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यतइत्यादिनासर्वंज्ञानप्लवेनैववृजिनंसंतरिष्यसीत्यादिनाच ज्ञाननिष्ठस्यश्रेष्ठत्वमुक्तम् एवमुभयोःश्रैष्ठ्येऽपिविशेषजिज्ञासयाभगवंतंप्रति अर्जुनउवाच एवमिति एवंसर्वकर्मार्पणादिनासततंयुक्तास्त्वन्निष्ठाःसंतोयेभक्ताःत्वांविश्वरूपंसर्वज्ञंसर्वशक्तिंपर्युपासते ध्यायंति येचाप्यक्षरंब्रह्मअव्यक्तंनिर्विशेषंउपासते तेषांउभयेषांमध्येअतिशयेनकेयोगविदःश्रेष्ठाइत्यर्थः १

तत्रप्रथमाः श्रेष्ठाइत्युत्तरं श्रीभगवानुवाच मयीति मयिपरमेश्वरेसर्वज्ञत्वादिगुणविशिष्टेमनः आवेश्यैकाग्रंकृत्वानित्ययुक्ताः मदर्थकर्मानुष्ठानादिनामन्निष्ठाः
संतः श्रेष्ठया श्रद्धयायुक्तायेमामाराधयंति तेयुक्ततमामममाभिमताः २ तर्हिइतरेकिंनश्रेष्ठाइत्यत्रआह येत्विति द्वाभ्याम् येत्वक्षरंपर्युपासते ध्यायंति
तेपिमामेवप्राप्नुवंतीतिद्वयोरन्वयः अक्षरस्यलक्षणमनिर्देश्यमित्यादि अनिर्देश्यंशब्देनव्यपदेष्टुमशक्यम् अतोऽव्यक्तंरूपादिहीनंसर्वत्रगंसर्वव्यापि

श्रीभगवानुवाच मय्यावेश्यमनोयेमांनित्ययुक्ताउपासते श्रद्धयापरयोपेतास्तेमेयुक्ततमामताः २ येत्वक्षरमनिर्देश्य
मव्यक्तंपर्युपासते सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवम् ३ सन्नियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः तेप्राप्नुवंतिमामेवसर्व
भूतहितेरताः ४ क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम् अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते ५

अव्यक्तत्वादेवाचिंत्यंकूटस्थंकूटेमायाप्रपंचेस्थितम् अधिष्ठानत्वेनस्थितं अचलंवृद्ध्यादिरहितम् अतएवध्रुवंनित्यम् ३ सन्नियम्येति स्प
ष्टमन्यत् ४ ननुचतेऽपित्वामेवप्राप्नुवंति तर्हिइतरेषांयुक्ततमत्वंकुतइत्यपेक्षायांक्लेशाक्लेशकृतंविशेषमाह क्लेशइतित्रिभिः अव्यक्तेनिर्वि-
शेषे अक्षरे आसक्तंचेतोयेषांतेषांक्लेशोऽधिकतरः हियस्मादव्यक्तविषयागतिर्निष्ठा देहाभिमानिभिः दुःखंयथाभवत्येवमवाप्यते देहाभिमा ७२
निनांनित्यंप्रत्यक्प्रवणत्वस्यदुर्घटत्वादितिभावः ५ ध ध ध ध ध

मद्भक्तानांमत्प्रसादादनायासनएवसिद्धिर्भवतीत्याह येत्विति द्वाभ्याम् मयिपरमेश्वरे सर्वाणिकर्माणिसंन्यस्यसमर्प्यमत्पराभूत्वामांध्यायंतः अनन्येन नविद्यते अन्योभजनीयोयस्मिन्तेनैवएकांत भक्तियोगेनोपासतइत्यर्थः ६ तेषामिति एवंमयि आवेशितंचेतोयैस्तेषांमृत्युयुक्तात्संसारसाग रादहंसम्यगुद्धर्त्ताअचिरेणैवभवामि ७ यस्मादेवंतस्मान्मय्येवेति मय्येवसंकल्पविकल्पात्मकंमनआधत्स्व स्थिरीकुरु बुद्धिमपि अध्यवसा- यात्मिकांमय्येवप्रवेशय एवंकुर्वन्मत्प्रसादेनलब्धज्ञानः सन्नतऊर्ध्वंदेहांतेस्मरणानंतरंमय्येवनिवसिष्यसि निवत्स्यसि मदात्मनावासंकरिष्यसि

येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः अनन्येनैवयोगेनमांध्यायंतउपासते ६ तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात् भवा मिनचिरात्पार्थमय्यावेशितचेतसाम् ७ मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय निवसिष्यसिमय्येव अतऊर्ध्वंनसंशयः ८ अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरम् अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय ९ अभ्यासेऽप्यसमर्थोऽसिमत्कर्मपरमो भव मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि १०

नात्रसंशयः तथाचश्रुतिः देहांतेदेवस्तारकंपरब्रह्मव्याचष्टइति ८ अत्रासक्तंप्रतिसुगमो पायमाह अथेति स्थिरंयथाभवत्येवंमयिचित्तंधारयितुंयदिशक्तोनभवसि तर्हिविक्षिप्तचित्तंपुनः प्रत्याहृत्यममानुस्मरणलक्षणोयोगाभ्यासस्तेनमांप्राप्तु मिच्छप्रयत्नंकुरु ९ यदिपुनःअभ्यासइति अभ्यासेऽपियद्यशक्तोऽसितर्हिमदीयत्यर्थानियानिकर्माणिएकादश्युपवासव्रतचर्यानामसंकीर्त्तनादीनितदनुष्ठा नमेवपरमंयस्यतादृशोभव एवंभूतानिकर्माण्यपिमदर्थंकुर्वन्मोक्षंप्राप्स्यसि १०

अत्यंतंभगवद्धर्मपरिनिष्ठायामशक्तस्य पक्षांतरमाह अथैतदपीति अथैतदपिकर्त्तुमशक्तोऽसितर्हिमद्योगंमदेकशरणत्वमाश्रितः सर्वेषांदृष्टार्थानामावश्य
कानांचाग्निहोत्रादिकर्मणांफलानिनियतचित्तोभूत्वापरित्यज एतदुक्तंभवति मयातावदीश्वराज्ञयायथाशक्तिकर्माणिकर्त्तव्यानि फलंपुनर्दृष्टमदृष्टंवापर
मेश्वराधीनमित्येवंमयिभारमारोप्यफलासक्तिंपरित्यज्यवर्त्तमानोमत्प्रसादेनकृतार्थोभविष्यसीति ११ तमिमंफलत्यागंस्तौति श्रेयोहीति सम्यक्ज्ञा
नरहिताद्भ्यासात् युक्तिसहितोपदेशपूर्वकंज्ञानंश्रेष्ठंतस्मादपितत्पूर्वकंध्यानंश्रेष्ठम् ततस्तुतंपश्यतिनिष्कलंध्यायमानइतिश्रुतेः तस्मादपिउक्तलक्षणः क-

अथैतदप्यशक्तोऽसि कर्त्तुंमद्योगमाश्रितः सर्वकर्मफलत्यागंततःकुरुयतात्मवान् ११ श्रेयोहिज्ञानमभ्यासाज्ज्ञानाद्ध्यानंविशि
ष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरम् १२ अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच निर्ममोनिरहंकारःसमदुःखसुखः
क्षमी १३ संतुष्टःसततंयोगीयतात्मादृढनिश्चयः मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः १४

र्मफलत्यागः श्रेष्ठः तस्मादेवंभूतात्क
र्मफलत्यागात्कर्मसुतत्फलेषुचासक्तिनिवृत्त्यामत्प्रसादेनचसमनंतरमेव संसारशांतिर्भवति १२ एवंभूतस्यभक्तस्यक्षिप्रमेवपरमेश्वरप्रसादहेतून् धर्मानाह
अद्वेष्टेत्यष्टभिः सर्वभूतानांयथायथमद्वेष्टा मैत्रः करुणश्च उत्तमेषुद्वेषशून्यः समेषुमित्रतयावर्त्ततइतिमैत्रः हीनेषुकृपालुरित्यर्थः निर्ममोनिरहंकारश्च कृपालु ७३
त्वादेवान्यैःसह समेसुखदुःखेयस्यसः क्षमीक्षमावान् १३ संतुष्टइति सततंलाभेअलाभेचसंतुष्टः प्रसन्नचित्तः योगीअप्रमत्तः यतात्मासंयतस्वभावः दृ
ढोमद्विषयोनिश्चयोयस्य मय्यर्पितेमनोबुद्धीयेन एवंभूतोयोमद्भक्तः समेप्रियः १४

किंच यस्मादिति यस्मात्सकाशाल्लोकोजनोनोद्विजते भयशंकयासंक्षोभंनप्राप्नोति यश्चलोकान्नोद्विजते यश्चस्वाभाविकैर्हर्षादिभिर्मुक्तः तत्रहर्षः स्व
स्येष्टार्थलाभेउत्साहः अमर्षः परस्यलाभेऽसहनम् भयंत्रासः उद्वेगोभयादिनिमित्तचित्तक्षोभः एतैर्विमुक्तोयोमद्भक्तःसमेप्रियः १५ किंच अनपेक्षइ
ति यदृच्छोपस्थितेऽप्यर्थेनिःस्पृहः शुचिः बाह्याभ्यंतरशौचसंपन्नःदक्षअनलसः उदासीनः पक्षपातरहितः गतव्यथः आधिशून्यः सर्वान्दृष्टादृष्टा
र्थानारंभानुद्यमान्परित्यक्तुंशीलंयस्यसः एवंभूतःसन् योमद्भक्तःसमेप्रियः १६ किंच योनेति प्रियंप्राप्ययोनहृष्यति अप्रियंप्राप्ययोनद्वेष्टि इ

यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः १५ अनपेक्षःशुचिर्दक्षउदासीनोगतव्यथः
सर्वारंभपरित्यागीयोमद्भक्तःसमेप्रियः १६ योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति शुभाशुभपरित्यागीभक्तिमान्यःसमेप्रियः
१७ समःशत्रौचमित्रेचतथामानापमानयोः शीतोष्णसुखदुःखेषुसमःसंगविवर्जितः १८ तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेन
चित् अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः १९

ष्टार्थनाशेसतिनशोचति अप्राप्तमर्थंनकांक्षति शुभाशुभेपरित्यक्तुंशीलएवंभूतो
भूत्वा योमद्भक्तिमान्समेप्रियः १७ किंच समइतिशत्रौचमित्रेचसमः एकरूपः मानापमानयोरपितथासमएव हर्षविषादशून्यइत्यर्थः शीतोष्णयोः
सुखदुःखयोश्चसमःसंगविवर्जितः क्वचिदप्यनासक्तः १८ तुल्यइति तुल्येनिंदास्तुतीचयस्यमौनीसंयतवाक् येनकेनचिद्यथालब्धेनसंतुष्टः अनि
केतोनियतवासशून्यः स्थिरमतिः व्यवस्थितचित्तः एवंभूतो भक्तिमान्मेप्रियोनरः १९

उक्तधर्मज्ञानमुपसंहरति येत्विति यथोक्तंउक्तप्रकारंधर्म्मएवामृतं अमृतत्वसाधनत्वात् धर्म्यामृतमिदमितिकेचित्पठंति तत्ये उपासते अनुतिष्ठंति
श्रद्धांकुर्वंतोमत्परमाश्चसंतोमद्भक्ताः ते ऽतीवमेप्रियाइति २० दुःखमत्यक्तवर्त्मेन हृद्यविघ्नसतोबुधः सुखंकृष्णपदांभोजभक्तिसत्पथमाभजेत्
१ इतिसुबोधिन्यांटीकायांद्वादशोऽध्यायः १२ भक्तानामहमुद्धर्त्ता संसारादित्यवादियत् त्रयोदशेऽथतत्सिद्ध्यैतत्त्वज्ञानमुदीर्यते १ तेषाम
हंसमुद्धर्त्तामृत्युसंसारसागरात् भवामीतिपूर्वंप्रतिज्ञातम् तच्चात्मज्ञानंविनासंसारादुद्धरणंसंभवति इतितत्त्वज्ञानोपदेशार्थंप्रकृतिपुरुषविवेका

येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते श्रद्दधानामत्परमाभक्तास्तेऽतीवमेप्रियाः २० इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्म
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेभक्तियोगोनामद्वादशोऽध्यायः १२ श्रीभगवानुवाच इदंशरीरंकौंतेयक्षेत्र
मित्यभिधीयते एतद्योवेत्तितंप्राहुःक्षेत्रज्ञमितितद्विदः १ क्षेत्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत

र्थमध्यायआरभ्यते त
त्रयत्सप्तमेऽध्यायेअपराचपराचेतिप्रकृतिद्वयमुक्तम् तयोरविवेकाज्जीवभावमापन्नस्यचिदंशस्यायंसंसारः याभ्यांचजीवोपभोगार्थमीश्वरः
सृष्ट्यादिषुप्रवर्त्तते तदेवप्रकृतिद्वयंक्षेत्रक्षेत्रज्ञशब्दवाच्यंपरस्परंविविक्तंतत्त्वतोनिरूपयिष्यन् श्रीभगवानुवाच इदमिति इदंभोगायतनंशरीरंक्षे ७४
त्रमित्यभिधीयते संसारस्यप्ररोहभूमित्वात् एतद्योवेत्ति अहंममेतिमन्यते तंक्षेत्रज्ञंप्राहुः कृषीवलवत् फलभोक्तृत्वात् तद्विदः क्षेत्रक्षेत्रज्ञयोर्वि

वेकज्ञाः १ तदेवसंसारिस्वरूपमुक्तम् इदानींतस्यैवपारमार्थिकसंसारिस्वरूपमाह क्षेत्रज्ञमिति तंचक्षेत्रज्ञंसंसारिणंवस्तुतः सर्वक्षेत्रेष्वनुगतंमामेव विद्धि तत्त्वमसीतिश्रुत्यालक्षितेनचिदंशेनमद्रूपस्योक्तत्वात् आदरार्थमेवतज्ज्ञानंस्तौति क्षेत्रक्षेत्रज्ञयोर्यदेवंवैलक्षण्येनज्ञानंतदेवमोक्षहेतुत्वान्ममज्ञा नंमतम् अन्यत्तुवृथापांडित्यंबंधहेतुत्वादित्यर्थः तदुक्तम् तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये आयासायापरंकर्मविद्यान्याशिल्पनैपुणमिति २ अत्रचतुर्विंशतिभेदैर्भिन्नाप्रकृतिः क्षेत्रमित्यभिप्रेतंतथादेहरूपेणपरिणतायामेवतस्यामहंभावेनाविवेकः स्फुटइतितत्रहिवेकार्थमिदंशरीरंक्षेत्र-

क्षेत्रक्षेत्रज्ञयोर्ज्ञानंयत्तज्ज्ञानंमतंमम २ तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत् सचयोयत्प्रभावश्चतत्समासेनमेशृणु ३
ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक् ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः ४

मित्याद्युक्तम् तदेतत्प्रपंचयिष्यन्प्रति जानीते तत्क्षेत्रमिति यदुक्तंमयाक्षेत्रंतच्चक्षेत्रम् यत्स्वरूपतोजडंयत् दृश्यादिस्वभावम् यादृक्चयादृशंचइच्छादिधर्मकम् यद्विकारियैरिंद्रियादिवि कारैर्युक्तम् यतश्चप्रकृतिपुरुषसंयोगाद्भवति यदिति यैःस्थावरजंगमादिभेदैर्भिन्नमित्यर्थः सचक्षेत्रज्ञोयः स्वरूपतोयत्प्रभावतश्च अचिंत्यैश्व र्ययोगेनयैः प्रभावैः संपन्नः तत्सर्वंसंक्षेपतोमत्तःशृणु ३ कैर्विस्तरेणोक्तस्यायंसंक्षेपइत्यपेक्षायामाह ऋषिभिरिति ऋषिभिर्वसिष्ठादिभि र्योगशास्त्रेषुध्यानधारणविषयत्वेनवैराजादिरूपेणबहुधागीतंनिरूपितम् विविधैश्चनित्यनैमित्तिककाम्यविषयैः छंदोभिर्वेदैर्नानायजनीय-

देवतादिरूपेणगीनम् ब्रह्मणः सूत्रैः पदैश्चब्रह्मसूच्यतेसूच्यतेएभि रितिब्रह्मसूत्राणि यतोवाइमानि भूतानिजायंतइत्यादीनितटस्थलक्षणपराण्युप
निषद्वाक्यानि तथाचब्रह्मपद्यतेगम्यते साक्षात्ज्ञायतेएभिरितिपदानिस्वरूपलक्षणपराणिसत्यंज्ञानमनंतंब्रह्मेत्यादीनि तैश्चबहुधागीनम् किंच
हेतुमद्भिः सदेवसौम्येदमग्र आसीत्कथमसतः सदजायतेति तथाकोह्येवान्यात्कः प्राण्यात् यदेषआकाश आनंदोनस्यात् एषह्येवानंदयतीत्यादि-
युक्तिमद्भिःअन्यात् अपानचेष्टांकः कुर्यात्प्राण्यात् प्राणानांव्यापारंकोवाकुर्यादितिश्रुतिपदयोरर्थः विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया अ

महाभूतान्यहंकारोबुद्धिरव्यक्तमेवच इंद्रियाणिदशैकंच पंचचेंद्रियगोचराः ५

संदिग्धार्थप्रतिपादकैरित्यर्थः तदे
वमेतैर्विस्तरेणोक्तं बहुदुःसंग्रहं संक्षेपतः तुभ्यंकथयिष्यामिशृणिवत्यर्थः यद्वा अथातोब्रह्मजिज्ञासेत्यादीनि ब्रह्मसूत्राणिगृह्यंतेतान्येवब्रह्मपद्यतेनिश्चीयते ए-
भिरितिपदानि तैर्हेतुमद्भिः ईक्षतेर्नाशब्दं आनंदमयोभ्यासादित्यादिभिर्युक्तिमद्भिर्विनिश्चितार्थैः शेषंसमानम् ४ तत्रक्षेत्रस्वरूपमाह महाभूतानीति
द्वाभ्याम् महाभूतानिभूम्यादीनि अहंकारस्तत्कारणभूतः बुद्धिर्विज्ञानात्मकंमहत्तत्त्वम् अव्यक्तंमूलप्रकृतिः इंद्रियाणिबाह्यानिदश श्रोत्रत्वक्घ्राणदृ
क्जिह्वावाक्दोःमेढ्रं अंघ्रीपायुः एकंचमनः इंद्रियगोचराश्चपंचतन्मात्ररूपाएवशब्दादयः आकाशादिविशेषगुणतयाव्यक्ताःसंतोइंद्रियविषयाःपंच ५

६८।२

तदेवंचतुर्विंशतितत्त्वान्युक्तानि इच्छेति इच्छादयः प्रसिद्धाः संघातः शरीरंचेतनाज्ञानात्मिकामनोवृत्तिः धृतिः धैर्यम् एतेइच्छादयोदृश्यत्वान्नात्मधर्माःअपितु
मनोधर्माएव अतःक्षेत्रांतःपातिनएवउपलक्षणंचैतत्संकल्पादीनाम् तथाचश्रुतिः कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं
मनएवेति अनेनचयादृगिति प्रतिज्ञाताः क्षेत्रधर्मादर्शिताः एतत्क्षेत्रंसविकारंइंद्रियादिविकारसहितंसंक्षेपेणतुभ्यंमयोक्तमितिक्षेत्रोपसंहारः ६
इदानीमुक्तलक्षणात्क्षेत्रात् विविक्ततयाज्ञेयंशुद्धंक्षेत्रज्ञंविस्तरेणवर्णयिष्यन् तज्ज्ञानसाधनान्याह अमानित्वमितिपंचभिः अमानित्वंस्वगुणश्लाघा

इच्छाद्वेषःसुखंदुःखंसंघातश्चेतनाधृतिः एतत्क्षेत्रंसमासेनसविकारमुदाहृतम् ६ अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवम्
आचार्योपासनंशौचंस्थैर्यमात्मविनिग्रहः ७ इंद्रियार्थेषुवैराग्यमनहंकारएवच जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ८

राहित्यम् अदंभित्वंदंभराहित्यम् अहिंसापरपीडावर्जनम् क्षांतिःसहिष्णुत्वम् आर्जवमवक्रता आचार्योपासनंसद्गुरुसेवाशौचंबाह्याभ्यंतरंच तत्रबा
ह्यंमृज्जलादिना आभ्यंतरंचरागादिमलक्षालनम् तथाचस्मृतिः शौचंतुद्विविधंप्रोक्तंबाह्यमाभ्यंतरंतथा मृज्जलाभ्यांस्मृतंबाह्यंभावशुद्धिस्तथांतरमिति
स्थैर्यंसन्मार्गेप्रवृत्तस्यतदेकनिष्ठता आत्मविनिग्रहः शरीरसंयमः एतज्ज्ञानमितिप्रोक्तमितिपंचमेनान्वयः ७ किंच इंद्रियार्थेष्विति जन्मादिषुदुःख
दोषयोरनुदर्शनम् पुनःपुनरालोचनम् दुःखरूपस्यदोषस्यानुदर्शनमितिवास्यार्थमन्यत् ८ ७ ७ ७ ७

पावन्नाएगं

 किंच असक्तिरिति असक्तिः पुत्रादिपदार्थेषु प्रीतित्यागः अनभिष्वंगः पुत्रादीनां सुखे दुःखे वा अहमेव सुखी दुःखी चेत्यध्यासातिरेकाभावः इष्टानिष्टयोरुप
 पत्तिषु प्राप्तिषु नित्यं सर्वदा समचित्तत्वम् ९ किंच मयि चेति मयि परमेश्वरे अनन्य योगेन सर्वात्मदृष्ट्या अव्यभिचारिणी एकांत भक्तिः विविक्तः शुद्धचित्त
प्रसादकरः तं देशं सेवितुं शीलं यस्य तस्य भावस्तत्त्वम् प्राकृतानां जनानां संसदि सभायां अरतिः रत्यभावः १० किंच अध्यात्मेति आत्मानमधिकृत्य
वर्त्तमानं ज्ञानं अध्यात्मज्ञानम् तस्मिन्नित्यत्वं नित्यभावः त्वंपदार्थशुद्धिनिष्ठत्वमित्यर्थः तत्त्वज्ञानस्यार्थः प्रयोजनं मोक्षः तस्य दर्शनं मोक्षस्य सर्वोत्कृष्ट

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यंच समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी
वरद विविक्तदेशसेवित्वमरतिर्जनसंसदि १० अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा सभाद
११ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते

तालोचनमित्यर्थः एतत् अमानित्वमदंभित्वमित्यादि विंशति संख्यात्मकं यदुक्तमेतज्ज्ञानमि
ति प्रोक्तम् ज्ञानसाधनत्वात् अतोऽन्यथाऽस्माद्विपरीतं मानित्वादि यदेतदज्ञानमिति प्रोक्तं वसिष्ठादिभिः ज्ञानविरोधित्वात् अतः सर्वथा त्याज्यमित्यर्थः
११ एभिः साधनैर्यज्ज्ञेयं तदाह ज्ञेयमिति यत्ज्ञेयं तत्प्रवक्ष्यामि श्रोतुरादरसिद्धये ज्ञानफलं दर्शयति यद्वक्ष्यमाणं ज्ञात्वाऽमृतं मोक्षं प्राप्नोति किं तत् ७६
अनादिमत् आदिमत्त भवतीत्यनादिमत् परं निरतिशयं ब्रह्म अनादीत्येतावतैव बहुव्रीहिणा अनादित्वे सिद्धेऽपि पुनर्मतुपः प्रयोगः छांदसः यद्वा अ

नादीतिमत्पर भितिच पदद्वयंममविष्णोः परंनिर्विशेषंरूपंब्रह्मेत्यर्थः तदेवाह नसत्तन्नासदुच्यते विधिमुखेनप्रमाणस्यविषयः सच्छब्देनोच्यते नि-
षेधस्यविषयस्त्वसच्छब्देनोच्यते इदंतुतदुभयविलक्षणं अविषयत्वादित्यर्थः १२ नन्वेवंब्रह्मणाऽसदसद्विलक्षणत्वेसतिसर्वंखल्विदंब्रह्म ब्रह्मैवेदंस
र्वमित्यादिश्रुतिभिर्विरुद्ध्येतेत्याशंक्यपरास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानबलक्रियाचेत्यादिश्रुतिप्रसिद्ध्याऽचिंत्यशक्त्यासर्वात्मतांतस्यद-
र्शयन्नाह सर्वतइतिपंचभिः सर्वतःपाणयः पादाश्चयस्यतत् सर्वत्राक्षीणिशिरांसिमुखानिचयस्यतत् सर्वतःश्रुतिमत् श्रवणेंद्रियैर्युक्तंसल्लोकेसर्व

अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते १२ सर्वतःपाणिपादंतत्सर्वतोऽक्षिशिरोमुखम् सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति
१३ सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितम् असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच १४ बहिरंतश्चभूतानामचरंचरमेवच

मावृत्यव्याप्यतिष्ठति सर्वतःप्राणिवृत्तिभिः पाण्यादिभिरुपाधिभिः सर्वव्यवहारास्पदत्वंनतिष्ठतीत्यर्थः १३ किंच सर्वेंद्रियेति सर्वेषांचक्षुरादीनांइंद्रि-
याणांगुणेषुरूपाद्याकारासुवृत्तिषुतत्तदाकारेणभासतइतितथासर्वाणींद्रियाणिगुणांश्चतत्तद्विषयानाभासयतीतिवा सर्वेंद्रियैर्विवर्जितंच तथाचश्रु
तिः अपाणिपादोजवनोगृहीतापश्यत्यचक्षुः सशृणोत्यकर्णइत्यादि असक्तंसंगशून्यम् तथाऽपिसर्वंबिभर्तीतिसर्वभृत् सर्वस्याधारभूतम् तदेवनिर्गुणं
सत्त्वादिगुणरहितम् गुणानांसत्त्वादीनांभोक्तृचपालकम् १४ किंच बहिरिति भूतानांचराचराणांस्वकार्याणांबहिश्चांतश्चतदेवसुवर्णमिवकटककुंडलादी

नाम् अचरंस्थावरंचरंजंगमंयद्भूतजातंतदेवकारणात्मकत्वात्कार्यस्य एवमपिसूक्ष्मत्वाद्रूपादिहीनत्वात्तदविज्ञेयमिदंतादितिस्पष्टंज्ञानार्हंनभवति अतएवअ
विदुषांयोजनलक्षांतरितमिवदूरस्थंचसविकारायाःप्रकृतेःपरत्वात् विदुषांपुनःप्रत्यगात्मत्वादंतिकेचतन्नित्यंसन्निहितम् तथाचमंत्रः यदेजतितन्नैजति
तद्दूरेतदंतिकेतदंतरस्यसर्वस्यतदुसर्वस्यास्यबाह्यतइति एजतिचलतिनैजतिनचलतितत् उअंतिकेइतिच्छेदः १५ किंच अविभक्तमिति भूतेषुस्थावर
जंगमात्मकेषु अविभक्तंकारणात्मनाअभिन्नंकार्यात्मनाविभक्तंचभिन्नमिवावस्थितंचतत्पूर्वोक्तंचज्ञेयम् भूतानांभर्तृचपोषकंस्थितिकाले प्रलयका

सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् १५ अविभक्तंचभूतेषुविभक्तमिवचस्थितम् भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच १६
ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितम् १७

लेचग्रसिष्णु ग्रसनशीलम् सृष्टिकालेचप्रभवि
ष्णु नानाकार्यात्मनाप्रभवनशीलम् १६ किंच ज्योतिषामिति ज्योतिषांचंद्रादित्यादीनामपितज्ज्योतिःप्रकाशकं ततोयेनसूर्यस्तपतितेजसेद्धः नतत्रसू
र्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निस्तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीत्यादिश्रुतेः अतएवतमसोऽज्ञानात्परं ते
नासंस्पृष्टमुच्यते अदित्यवर्णंतमसःपरस्तादित्यादिश्रुतिभिः ज्ञानंचतदेवबुद्धिवृत्तावभिव्यक्तंतदेवरूपाद्याकारेणज्ञेयंचज्ञानेनगम्यंच अमानित्वम
दंभित्वमित्यादिलक्षणेनपूर्वोक्तेनज्ञानसाधनेनप्राप्यमित्यर्थः ज्ञानगम्यंविशिनष्टि सर्वस्यप्राणिमात्रस्यहृदिविष्ठितंविशेषेणाप्रच्युतस्वरूपेणानि
यंतृतयास्थितम् धिष्ठितमितिपाठेऽधिष्ठायस्थितमित्यर्थः १७

उक्तंक्षेत्रादिकमधिकारिफलसहितमुपसंहरति इतीति इत्येवंक्षेत्रंमहाभूतादिधृत्यंतंतथाज्ञानंच अमानित्वादितत्त्वज्ञानार्थदर्शनांतम्ज्ञेयंच अनादिमत्परं
ब्रह्मेत्यादिधिष्ठितमित्यंतम् वसिष्ठादिभिर्विस्तरेणोक्तंसर्वमपिमयासंक्षेपेणोक्तम् एतच्चपूर्वाध्यायोक्तलक्षणोमद्भक्तोविज्ञायमद्भावायब्रह्मत्वायउप
पद्यतेयोग्योभवति १८ तदेवंतत्क्षेत्रंयच्चयादृक्चेत्येतावत्प्रपंचितम् इदानींतुयद्विकारियतश्चयत् सचयोयत्प्रभावश्चेत्येतत्पूर्वंप्रतिज्ञातमेवप्रकृति
पुरुषयोः संसारहेतुत्वकथनेनप्रपंचयति प्रकृतिमिपंचभिः तत्रप्रकृतिपुरुषयोरादिमत्वेतयोरपिप्रकृत्यंतरेणभाव्यमित्यनवस्थापत्तिःस्यात् अत

इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते १८ प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि विका
रांश्चगुणांश्चैवविद्धिप्रकृतिसंभवान् १९ कार्यकारणकर्तृत्वेहेतुःप्रकृतिरुच्यते

स्तावुभावनादीविद्धि अनादेरीश्वरस्यशक्तित्वा
त्प्रकृतिरनादिः पुरुषोऽपितदंशत्वादनादिरेव अत्रचपरमेश्वरस्यतच्छक्तीनांचानादित्वम् नित्यत्वंचश्रीमच्छंकरभगवद्भाष्यकृद्भिरतिप्रबंधेनो
पपादितमितिनास्माभिः प्रतन्यते विकारांश्चदेहेंद्रियादीन्गुणांश्चगुणपरिणामान्सुखदुःखमोहादीन्प्रकृतेःसंभवान्संभूतान्विद्धि १९ विका
राणांप्रकृतिसंभवत्वंदर्शयन्पुरुषस्यसंसारहेतुत्वंदर्शयति कार्यकारणेति कार्यंशरीरम् कारणानिसुखदुःखसाधनानींद्रियाणितेषांकर्तृत्वेतदा
कारपरिणामेप्रकृतिर्हेतुरुच्यते कपिलादिभिः पुरुषोजीवस्तत्कृतसुखदुःखानांभोक्तृत्वेहेतुरुच्यते अयंभावः यद्यप्यचेतनायाःप्रकृतेः स्वतः क

तृंत्वंनसंभवति तथापुरुषस्याप्यविकारिणोभोक्तृत्वंनसंभवति तथाऽपिकर्तृत्वंनामक्रियानिर्वर्त्तकत्वम् नन्वचेतनस्यापिचेतनोदृष्टवशात्संभवति यथा वन्हेरूर्ध्वज्वलनम् वायोस्तिर्यग्गमनम् वत्सादृष्टवशात्स्तन्यपयसः क्षरणमित्यादि अतःपुरुषसान्निधानात्प्रकृतेः कर्तृत्वमुच्यते भोक्तृत्वंचसुखदुःखसंवे दनम् तच्चेतनधर्मएवेतिप्रकृतिसंन्निधानात्पुरुषस्यभोक्तृत्वमुच्यतइति २० तथाऽप्यविकारिणोजन्मरहितस्यचभोक्तृत्वंकथमित्यत आह पुरुषइति हियस्मात्प्रकृतिस्थः तत्कार्यदेहेतादात्म्येनस्थितः पुरुषः अतस्तज्जनितान्सुखादीन् भुंक्ते अस्यचपुरुषस्यसतीषुदेवादियोनिषु असतीषुतिर्यगादियो

पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते २० प्रकृतिःपुरुषस्थोहि भुंक्तेप्रकृतिजान्गुणान् कारणंगुणसंगोस्यसदसद्योनिजन्मसु २१ उपद्रष्टाऽनुमं ताचभर्त्ताभोक्तामहेश्वरः परमात्मेतिचाप्युक्तोदेहेऽस्मिन्पुरुषःपरः २२

निषुयानिजन्मानितेषुगुणसंगः शुभाशुभकर्मकारिभिरिंद्रियैः संगःकारणमि त्यर्थः २१ तदनेनप्रकारेणप्रकृत्यविवेकात्पुरुषस्यसंसारः नतुस्वरूपतइत्याशयेनतस्यस्वरूपमाह उपद्रष्टेति अस्मिन्प्रकृतिकार्येदेहेचवर्त्तमानोऽपि पुरुषः परः भिन्नएवनतद्गुणैर्युज्यतइत्यर्थः तत्रहेतवः यस्मादुपद्रष्टा पृथग्भूतएवसमीपेस्थित्वाद्रष्टासाक्षीत्यर्थः तथाऽनुमंता अनुमोदितेवसन्निधिमा त्रेणानुग्राहकः साक्षीचेताकेवलोनिर्गुणश्चेत्यादिश्रुतेः तथाऐश्वरेणरूपेणभर्त्ताविधारकइतिचोक्तःभोक्तापालकइतिच महांश्चासावीश्वरश्च सब्र- ह्मादीनामधिपतिरितिच परमात्मा अंतर्यामीतिचोक्तः श्रुत्यातथाचश्रुतिः एषभूताधिपतिरेषलोकेश्वरएषलोकपालइत्यादि २२ ७ ७८

एवंप्रकृतिपुरुषविवेकज्ञानिनंस्तौति यएवमिति एवमुपद्रष्टृत्वादिरूपेणपुरुषंयोवेत्ति प्रकृतिंचगुणैः सुखदुःखादिपरिणामैः सहितांयोवेत्तिसपुरुषः
सर्वथाविधिमतिलंघ्यवर्त्तमानोऽपिपुनर्नाभिजायते मुच्यतएवेत्यर्थः २३ एवंभूतविविक्तात्मज्ञानेसाधनविकल्पानाह ध्यानेनेतिद्वाभ्याम् ध्यानेन
आत्माकारप्रत्ययावृत्त्याआत्मनिदेहे आत्मनामनसाएनमात्मानंकेचित्पश्यंति अन्येतुसांख्येनप्रकृतिपुरुषवैलक्षण्यालोचनेन योगेनाष्टांगेन अपरे
चकर्मयोगेनपश्यंतीतिसर्वत्रानुषंगः एतेषांचध्यानादीनांयथायोग्यंक्रमसमुच्चयेसत्यपितत्तन्निष्ठाभेदाभिप्रायेणविकल्पोक्तिः २४ अतिमंदाधि

यएवंवेत्तिपुरुषंप्रकृतिंचगुणैःसह सर्वथावर्त्तमानोऽपिनसभूयोभिजायते २३ ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मना
अन्येसांख्येनयोगेनकर्मयोगेनचापरे २४ अन्येत्वेवमजानंतः श्रुत्वाऽन्येभ्यउपासते तेऽपिचातितरंत्येवमृत्युंश्रुतिपरायणाः
२५ यावत्संजायतेकिंचित्सत्वंस्थावरजंगमम् क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धिभरतर्षभ २६

कारिणांनिस्तारोपायमाह अन्यइति अ
न्येतुसांख्ययोगादिमार्गेणैवंभूतमुपद्रष्टृत्वादिलक्षणमात्मानंसाक्षात्कर्त्तुमजानंतोऽन्येभ्य आचार्येभ्य उपदेशेनश्रुत्वाउपासते ध्यायंति तेचश्रद्धयाउ
पदेशश्रवणपरायणाः संतोमृत्युंसंसारंशनैरतितरंत्येव २५ तत्रकर्मयोगस्यतृतीयचतुर्थपंचमेषुप्रपंचितत्वात् ध्यानस्यचयोगस्यचषष्ठाष्टमयोः
प्रपंचितत्वात् ध्यानादेश्चसांख्यविविक्तात्मविषयत्वात्सांख्यमेवप्रपंचयन्नाह यावदित्यादियावत्समाप्ति यावत्किंचिद्वस्तुमात्रंसत्वमुत्पद्यते त
त्सर्वंक्षेत्रक्षेत्रज्ञयोः योगात् अविवेककृतात्तादात्म्याध्यासाद्भवतीतिजानीहि २६

अविवेककृतंसंसारोद्भवमुक्त्वातन्निवृत्तयेविविक्तात्मविषयंसम्यग्दर्शनमाह समामिति स्थावरजंगमात्मकेषुभूतेषुनिर्विशेषंसद्रूपेणसमंयथाभवत्येवंति ष्ठंतं परमात्मानंयःपश्यति. अतएवतेषुविनश्यत्स्वपि अविनश्यंतंयःपश्यति सएवसम्यक्पश्यतिनान्यः २७ कुतइत्यतआह समामिति सर्वत्रभूतमात्रे समंसम्यगप्रच्युतस्वरूपेणावस्थितंपरमात्मानंपश्यन् हियस्मात् आत्मनास्वेनैवात्मानंनहिनस्ति अविद्ययासच्चिदानंदरूपमात्मानंतिरस्कृत्यनवि

समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरम् विनश्यत्स्वविनश्यंतंयःपश्यतिसपश्यति २७ समंपश्यन्हिसर्वत्रसमवस्थित मीश्वरम् नहिनस्त्यात्मनात्मानंततोयातिपरांगतिम् २८ प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वशः यःपश्यतित्त थात्मानमकर्त्तारंसपश्यति २९

नाशयति ततश्चपरांगतिंमोक्षमाप्नोति यस्त्वेवंनपश्यति सहिदेहात्मदर्शीदेहेनसहात्मानंहिनस्ति तथाचश्रुतिः असूर्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंति येकेचात्महनोजनाइति २८ ननुशुभाशुभकर्मकर्तृत्वेनवैषम्येदृश्य मानेकथमात्मनः समत्वमित्याशंक्याह प्रकृत्यैवेति प्रकृत्यैवदेहेंद्रियाकारेणपरिणतयासर्वशः सर्वैः प्रकारैः क्रियमाणानि कर्माणियःपश्यति त- थाऽत्मानंचाकर्त्तारं देहाभिमानेनैवात्मनः कर्तृत्वंनस्वतः इत्येवंयःपश्यति सएवसम्यक्पश्यतिनान्यइत्यर्थः २९ ॥ ॥ ॥

इदानींतु भूतानां प्रकृतितावन्मात्रत्वेनाभेदाद्भूतभेदकृतमप्यात्मनोऽभेदमपश्यन् ब्रह्मत्वमुपैतीत्याह यदेति यदाभूतानांस्थावरजंगमानांपृथग्भावंभेदं
पृथक्त्वम् एकस्थंएकस्यामेवेश्वरशक्तिरूपायांप्रकृतौस्थितंप्रलये अनुपश्यति आलोचयति ततएवचतस्याएवप्रकृतेः सकाशाद्भूतानांविस्तारंसृष्टि-
समयेऽनुपश्यति तदाप्रकृतितावन्मात्रत्वेनभूतानामप्यभेदंपश्यन्परिपूर्णब्रह्मसंपद्यते ब्रह्मैवभवतीत्यर्थः ३० तथापिपरमेश्वरस्यसंसाराव-
स्थायांदेहकर्मसंबंधनिमित्तैः कर्मभिस्तत्फलैश्चसुखदुःखादिभिश्चवैषम्यंदुःपरिहरमितिकुतःसमदर्शनंतत्राह अनादित्वादिति यदुत्प

यदाभूतपृथग्भावमेकस्थमनुपश्यति ततएवचविस्तारंब्रह्मसंपद्यतेतदा ३० अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः
शरीरस्थोऽपिकौंतेयनकरोतिनलिप्यते ३१ यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते सर्वत्रावस्थितोदेहेतथाऽत्मानो
पलिप्यते ३२ यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारत ३३

त्तिमत् तदेवहिव्येति
विनाशमेति यच्चगुणवद्वस्तुतस्यगुणनाशेव्ययोभवति अयंतुपरमात्मा अनादिर्निर्गुणश्चातोऽव्ययः अविकारीत्यर्थः तस्माच्छरीरेस्थितोऽपिकिंचि
न्नकरोति नचकर्मफलैर्लिप्यतइति ३१ तत्रदृष्टांतमाह यथेति यथासर्वत्रपंकादिष्वपिस्थितमाकाशंसौक्ष्म्यादसंगत्वात्पंकादिभिर्नोपलिप्यते
तथासर्वत्रउत्तमे अधमेवादेहेवा अवस्थितोऽप्यात्मानोपलिप्यते दैहिकैर्गुणदोषैर्नयुज्यतइत्यर्थः ३२ असंगत्वाल्लेपोनास्तीत्याकाशदृष्टांतेनोक्त
म् प्रकाशकत्वाच्चप्रकाश्यधर्मैर्नयुज्यतइतिरविदृष्टांतेनाह यथेति स्पष्टार्थः ३३

अध्यायार्थमुपसंहरति क्षेत्रक्षेत्रज्ञयोरिति एवमुक्तप्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं भेदं विविक्तज्ञानलक्षणेन चक्षुषा ये विदुः तथा चैवमुक्ता भूतानां प्रकृतिस्तस्याः सकाशान्मोक्षं मोक्षोपायं ध्यानादिकं च ये विदुः ते परं पदं यांति ३४ विविक्तौ येन तत्त्वेन मिश्रौ प्रकृतिपूरुषौ तं वंदे परमानंदं नंदनंदनमीश्वरम् १ इति सुबोधिन्यां टीकायां त्रयोदशोऽध्यायः १३ पुंप्रकृत्योः स्वतंत्रत्वं वारयन्गुणसंगतः प्राह संसारवैचित्र्यं विस्तरेण चतुर्दशे १ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमम् क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभेत्युक्तम् स च क्षेत्रक्षेत्रज्ञयोः संयोगो निरीश्वरसांख्यानामिव न स्वातंत्र्ये

क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परम् ३४ इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिपुरुषनिर्देशयोगो नाम त्रयोदशोऽध्यायः १३ श्रीभगवानुवाच परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः १

णः किंत्वीश्वरेच्छयैवेति कथनपूर्वकं कारणं गुणसंगोऽस्य सदसद्योनिजन्मस्वित्यनेनोक्तं सत्त्वादिगुणकृतं संसारवैचित्र्यं प्रपंचयिष्यन् एवंभूतं वक्ष्यमाणमर्थं स्तौति श्रीभगवानुवाच परं भूय इति द्वाभ्याम् परं परमार्थनिष्ठं ज्ञायते ऽनेनेति ज्ञानमुपदेशं भूयोऽपि तुभ्यं प्रकर्षेण वक्ष्यामि कथंभूतम् ज्ञानानां तपःकर्मादिविषयाणां मध्ये उत्तमम् मोक्षहेतुत्वात् न देवाह यत् ज्ञात्वा प्राप्य मुनयो मननशीलाः सर्वे इतो देहबंधनात्परां सिद्धिं गताः प्राप्ताः १ ८०

किंच इदमिति इदंवक्ष्यमाणंज्ञानमुपाश्रित्यइदंज्ञानसाधनमनुष्ठायममसाधर्म्यंमद्रूपत्वंप्रासाः संतःसर्गेऽपिब्रह्मादिषूत्पद्यमानेष्वपिनोत्पद्यंते तथा प्रलयेनव्यथंति प्रलयेदुःखानिनानुभवंति पुनर्नावर्त्तंनइत्यर्थः २ तदेवंप्रशंसयाश्रोतारमभिमुखीकृत्यपरमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्पत्तिंप्रतिहेतुत्वम् नतुस्वतंत्रयोरितीमंविवक्षितमर्थंकथयति ममेति देशतः कालतश्चानवच्छिन्नत्वान्महत् वृंहणत्वाच्चस्वकार्याणांवृद्धिहेतुत्वात्ब्रह्मप्रकृतिरित्यर्थः तन्महत्ब्रह्मममपरमेश्वरस्ययोनिः गर्भाधानस्थानंतस्मिन्नहंगर्भंजगद्विस्तारहेतुंचिदाभासंदधामि निक्षिपामि प्रल

इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः सर्गेऽपिनोपजायंतेप्रलयेनव्यथंतिच २ ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहम् संभवःसर्वभूतानांततोभवतिभारत ३ सर्वयोनिषुकौंतेयमूर्त्तयःसंभवंतियाः तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता ४ सत्वंरजस्तमइतिगुणाःप्रकृतिसंभवाः

येमयिलीनंसंतमविद्याकामकर्मानुशयवंतंक्षेत्रज्ञंसृष्टिसमयेभोग्येनक्षेत्रेणसंयोजयामीत्यर्थः ततोगर्भाधानात्सर्वभूतानांब्रह्मादीनांसंभवउत्पत्तिर्भवति ३ नकेवलंसृष्ट्युपक्रमएवमदधिष्ठिताभ्यांप्रकृतिपुरुषाभ्यामयंभूतोत्पत्तिप्रकारः अपितुसर्वदैवेत्याह सर्वयोनिष्विति सर्वासुयोनिषुमनुष्यादियोनिषुयामूर्त्तयः स्थावरजंगमात्मिकाउत्पद्यंते तासांमूर्त्तीनांमहद्ब्रह्मप्रकृतिः योनिर्मातृस्थानीया अहंचबीजप्रदः गर्भाधानादिकर्त्तापिता ४ तदेवंपरमेश्वराधीनाभ्यांप्रकृतिपुरुषाभ्यांसर्वभूतोत्पत्तिंनिरूप्यइदानींप्रकृतिसंयोगेन-

पुरुषस्यसंसारंप्रपंचयति सत्वमित्यादिचतुर्दशभिः सत्वंरजस्तमइतित्रयोगुणाः प्रकृतिसंभवाः प्रकृतितः संभवउद्भवोयेषांतेनथोक्ताः गुणसाम्यंप्रकृ
तिः तस्याःसकाशात्पृथक्त्वेनाभिव्यक्ताः संतःप्रकृतिकार्येदेहेतादात्म्येनस्थितंदेहिनंचिदंशंवस्तुतोऽव्ययंनिर्विकारमेवसंतंनिबध्नंति स्वकार्यैः सुख-
दुःखमोहादिभिः संयोजयंतीत्यर्थः ५ तत्रसत्वस्यलक्षणंबंधकप्रकारंचाह तत्रेति तत्रतेषांगुणानांमध्येसत्वंनिर्मलत्वात्स्वच्छत्वात्स्फटिक

निबध्नंतिमहाबाहोदेहेदेहिनमव्ययम् ५ तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयम् सुखसंगेनबध्नातिज्ञानसंगेनचानघ ६
रजोरागात्मकंविद्धितृष्णासंगसमुद्भवम् तन्निबध्नातिकौंतेयकर्मसंगेनदेहिनम् ७

वत्भास्वरम् अनामयंचनिरुपद्रवंशांतमित्यर्थः अतःशांतत्वात्स्वकार्येणसुखेनयःसंगस्तेनबध्नाति प्रकाशकत्वाच्चस्वकार्येणज्ञानेनयःसंगस्ते
नबध्नाति हे अनघ निःपाप अहंसुखीज्ञानीचेतिमनोधर्मास्तदभिमानिनिक्षेत्रज्ञेसंयोजयतीत्यर्थः ६ रजसोलक्षणंबंधकत्वंचाह रजोरा-
गेति रजःसंज्ञकंगुणंरागात्मकमनुरंजनरूपंविद्धि अतएवतृष्णासंगसमुद्भवम् तृष्णाअप्राप्तेर्थेऽभिलाषःसंगःप्राप्तेर्थेप्रीतिःविशेषेणासक्तिःत ८१
योस्तृष्णासंगयोःसमुद्भवोयस्मात्तद्रजःदेहिनंदृष्टादृष्टार्थेषुकर्मसुसंगेनासक्त्यानितरांबध्नाति तृष्णासंगाभ्यांहिकर्मस्वासक्तिर्भवति ७

तमसोलक्षणंबंधकत्वंचाह तमस्त्विति तमस्तुअज्ञानाज्जातम् आवरणशक्तिप्रधानात्प्रकृत्यंशाद्भूतंविद्धीत्यर्थः अतःसर्वेषांदेहिनांमोहनंभ्रांतिजनकम् अतएवप्रमादेनालस्येननिद्रयाचतत्तमोदेहिनंनिबध्नाति तत्रप्रमादोनवधानम् आलस्यमनुद्यमः निद्राचित्तस्यावसादःलयः ८ सत्वादीनामेवंस्वस्वकार्यकरणेसामर्थ्यातिशयमाह सत्वमिति सत्वंसुखेसंजयतिसंश्लेषयति सुखदुःखशोकादिकारणेसत्यपिसुखाभिमुखमेवदेहिनंकरोतीत्यर्थः एवंसुखादिकारणेसत्यपिरजःकर्मण्येवसंयोजयति तमस्तुमहत्संगेनोत्पद्यमानमपिज्ञानमावृत्याच्छाद्यप्रमादेसंजय-

तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनाम् प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत ८ सत्वंसुखेसंजयतिरजःकर्मणिभा
रत ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत ९ रजस्तमश्चाभिभूयसत्वंभवतिभारत. रजःसत्वंतमश्चैवतमःसत्वंरजस्तथा
१० सर्वद्वारेषुदेहेऽस्मिन्प्रकाशउपजायते ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत ११

ति महद्भिरुपदिश्यमानस्यार्थस्यानवधानेयोजयति उतअपिआलस्यादावपिसंयोजयतीत्यर्थः ९ तत्रहेतुमाह रजइति रजस्तमश्चेतिगुणद्वयमभिभूयतिरस्कृत्यसत्वंभवति अदृष्टवशादुद्भवति ततःस्वकार्येसुखेज्ञानादौसंयोजयतीत्यर्थः एवंरजोपिसत्वंतमश्चगुणद्वयमभिभूयोद्भवति ततःस्वकार्येतृष्णाकर्मादौसंयोजयति एवंतमोऽपिसत्वंरजश्चाभिभूयोद्भवति ततश्चस्वकार्येप्रमादालस्यादौसंयोजयतीत्यर्थः १० इदानींसत्वादीनांवृद्धानांलिंगान्याहत्रिभिः सर्वद्वा

रेष्विति अस्मिन् आत्मनोभोगायतनेदेहेसर्वेष्वपिद्वारेषुश्रोत्रादिषुयदाशब्दादिज्ञानात्मकःप्रकाशउत्पद्यतेतदा अनेनप्रकाशलिंगेनसत्त्वंविवृद्धंविद्यात्
जानीयात् उतशब्दात्सुखादिलिंगेनापिजानीयादित्युक्तम् ११ किंच लोभइतिलोभः धनागमेबहुधाजायमानेपिपुनःपुनर्वर्धमानोऽभिलाषः प्रवृ
त्तिः नित्यंकुर्वद्रूपता कर्मणामारंभः गृहादिषुकर्मोद्यमः इदंकृत्वाइदंकरिष्यामीत्यादिसंकल्पविकल्पानुपरमः अशमःस्पृहा उच्चावचेषुदृष्टमात्रेषु
वस्तुष्वितस्ततोजिघृक्षा रजसिप्रवृद्धेसतिएतानिलिंगानिजायंते एतैर्लिंगैरजोगुणस्यवृद्धिंविद्यादित्यर्थः १२ किंच अप्रकाशइति अप्रकाशोवि

लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा रजस्येतानिजायंतेविवृद्धेभरतर्षभ १२ अप्रकाशोप्रवृत्तिश्चप्रमादोमोहएवच
तमस्येतानिजायंतेविवृद्धेकुरुनंदन १३ यदासत्त्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् तदोत्तमविदांल्लोकानमलान्प्रतिपद्यते १४
रजसिप्रलयंगत्वाकर्मसंगिषुजायते तथाप्रलीनस्तमसिमूढयोनिषुजायते १५

वेकभ्रंशः अप्रवृत्तिरनुद्यमः प्रमादः कर्तव्यार्थानुसं
धानराहित्यम् मोहोमिथ्याऽभिनिवेशः तमसिप्रवृद्धेएतानिलिंगानिचिन्हानिजायंते एतैःतमसोवृद्धिंजानीयात् १३ मरणसमयएववृद्धानांसत्वादीनां
फलविशेषमाह यदेतिद्वाभ्याम् सत्त्वेप्रवृद्धेसतियदाजीवोमृत्युंप्राप्नोति तदाउत्तमान् हिरण्यगर्भादीन्विंदंति उपासतइत्युत्तमविदःतेषांयेअम-
लाःप्रकाशमयालोकाःसुखोपभोगस्थानविशेषाः तान्प्रतिपद्यतेप्राप्नोति १४ किंच रजसीति रजसिप्रवृद्धेसति मृत्युंप्राप्यकर्मासक्तेषुमनुष्येषु-
जायते तथातमसिप्रवृद्धेसतिप्रलीनोमृतोमूढयोनिषुपश्वादिषुजायते १५ ॥

इदानींसत्वादीनांस्वानुरूपकर्मद्वारेणविचित्रफलहेतुत्वमाह कर्मणइति सुकृतस्यसात्विककर्मणः सात्विकंसत्वप्रधानंनिर्मलंप्रकाशबहुलंसुखंफ
लमाहुः कपिलादयः रजसइति राजसस्यकर्मणइत्यर्थः कर्मफलकथनस्यप्राकृतत्वात्तस्यदुःखंफलमाहुः तमसइति तामसस्यकर्मणइत्यर्थः तस्या
ज्ञानंमूढत्वंफलमाहुः सात्विकादिकर्मलक्षणंचनियतंसंगरहितमित्यादिनाऽष्टादशेवक्ष्यति १६ तत्रैवहेतुमाह सत्त्वादिति सत्त्वाज्ज्ञानंसंजायते
अतःसात्विकस्यकर्मणः प्रकाशबहुलंसुखंफलंभवति रजसोलोभोजायते तस्यचदुःखहेतुत्वात् तत्पूर्वकस्यकर्मणोदुःखंफलंभवति तमस

कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफलम् रजसस्तुफलंदुःखमज्ञानंतमसःफलम् १६ सत्वात्संजायतेज्ञानंरजसोलोभ
एवच प्रमादमोहौतमसोभवतोज्ञानमेवच १७ ऊर्ध्वंगच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः जघन्यगुणवृत्तिस्थाअधो
गच्छंतितामसाः १८

स्तुप्रमादमोहाज्ञानानिभवंति ततस्तामसस्यकर्मणोऽज्ञानप्रापकंफलंभवतीतियुक्तमेवेत्यर्थः १७ इदानींस
त्वादिवृत्तिशीलानांफलमाह ऊर्ध्वमिति सत्वस्थाःसत्वप्रवृत्तिप्रधानाऊर्ध्वंगच्छंति सत्वोत्कर्षतारतम्याद्युत्तरोत्तरशतगुणानंदान्मनुष्यगंधर्व-
पितृदेवादिलोकान्सत्यलोकपर्यंतान्प्राप्नुवंतीत्यर्थः राजसास्तुतृष्णाद्याकुलामध्येतिष्ठंति मनुष्यलोकेएवोत्पद्यंते जघन्योनिकृष्टस्तमोगुणः त
स्यवृत्तंप्रमादमोहादितत्रस्थिताः अधोगच्छंति तमोवृत्तितारतम्यात्ताभिस्त्रादिषुनिरयेषूत्पद्यंते १८ ७ ७ ७

तु ६१

तदेवं प्रकृतिगुणसंगकृतं संसारं सप्रपंचमुक्त्वाइदानीं तद्विवेकतो मोक्षं दर्शयति नान्यमिति यदा तु द्रष्टा विवेकी भूत्वा बुद्ध्याद्याकारपरिणतेभ्यो गुणेभ्यो ऽन्यं कर्त्तारं नानुपश्यति अपि तु गुणा एव कर्माणि कुर्वंतीति पश्यति गुणेभ्यश्च परं व्यतिरिक्तं तत्साक्षिणमात्मानं वेत्ति स तु मद्भावं ब्रह्मत्वं अधिगच्छति प्राप्नोति १९ ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह गुणानिति देहाकारः समुद्भवः परिणामो येषां ते देहसमुद्भवाः तानेतांस्त्रीन

नान्यं गुणेभ्यः कर्त्तारं यदा द्रष्टानुपश्यति गुणेभ्यश्च परं वेत्ति मद्भावं सोधिगच्छति १९ गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते २० अर्जुन उवाच कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्त्तते २१

पि गुणानतीत्य अतिक्रम्य तत्कृतैर्जन्मादिभिर्मुक्तः सन् अमृतमश्नुते ब्रह्मानंदं प्राप्नोति २० गुणानेतानतीत्यामृतमश्नुत इत्येतच्छ्रुत्वा गुणातीतस्य लक्षणमाचारं च गुणात्ययोपायं च सम्यक् बुभुत्सुरर्जुन उवाच कैर्लिंगैरिति हे प्रभो कैर्लिंगैः कीदृशैरात्मन्युत्पन्नैश्चिन्हैर्गुणातीतो देही भवतीति लक्षणप्रश्नः कः आचारो यस्येति किमाचारः कथं वर्त्तत इत्यर्थः कथं च केनोपायेनैतांस्त्रीनपि गुणानतीत्य वर्त्तते तत्कथयेति २१ ७

स्थितप्रज्ञस्यकाभाषेत्यादिनाद्वितीयाध्यायेपृष्टमपिदत्तोत्तरमपि पुनर्विशेषबुभुत्सयापृच्छतीतिज्ञात्वाप्रकारांतरेणतस्यलक्षणादिकंश्रीभगवानुवा
च प्रकाशंचेत्यादिषड्भिः तत्रएकेनलक्षणमाह प्रकाशंचेति प्रकाशंचसर्वद्वारेषुदेहेऽस्मिन्नितिपूर्वोक्तसत्वकार्यं प्रवृत्तिंचरजःकार्यम् मोहंचतमसः
कार्यम् उपलक्षणमेतत् सत्वादीनांसर्वाण्यपि कार्याणियथायथंसंप्रवृत्तानिस्वतः प्राप्तानिसंतिदुःखबुद्ध्यायोनद्वेष्टि निवृत्तानिचसंतिसुख
बुद्ध्यानकांक्षति गुणातीतः सउच्यतेइतिचतुर्थेनान्वयः २२ तदेवंस्वसंवेद्यंतस्यलक्षणमुक्त्वापरसंवेद्यंतस्यलक्षणंवक्तुंकिमाचारइतिद्विती

श्रीभगवानुवाच प्रकाशंचप्रवृत्तिंचमोहमेवचपांडव नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति २२ उदासीनवदासी
नोगुणैर्योनविचाल्यते गुणावर्त्तंतइत्येवयोऽवतिष्ठतिनेंगते २३ समदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः तुल्यप्रि
याप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः २४

यप्रश्नस्योत्तरमाहउदासीनवदितित्रिभिः उदासीनवत्साक्षितयाआसीनःस्थितःसन्
गुणैः गुणकार्यैः सुखदुःखादिभिर्योनविचाल्यते स्वरूपान्नप्रचाल्यते अपितुगुणाएवस्वकार्येषुवर्त्तंते एतैर्ममसंबंधएवनास्तिइतिवि-
वेकज्ञानेनयः तूष्णीमवतिष्ठति परस्मैपदमार्षम् नेंगतेनचलति २३ अपिच समेति समेसुखदुःखेयस्ययतः स्वस्थः स्वरूपएवस्थितः अ
तएवसमानिलोष्टाश्मकांचनानियस्य तुल्येप्रियाप्रियेसुखदुःखहेतुभूतेयस्यधीरोधीमान् तुल्यनिंदाच आत्मस्तुतिश्चयस्य २४ ७

अपिच मानापमानयोरिति मानेअपमानेचतुल्यः मित्रपक्षे अरिपक्षेचतुल्यः सर्वान्दृष्टादृष्टार्थानारंभानुद्यमान्परित्यक्तुंशीलंयस्य एवंभूतश्चारयु
क्तोगुणातीतउच्यते २५ कथंचैतान्गुणानतिवर्त्ततइत्यस्यप्रश्नस्योत्तरमाह मांचेति चशब्दोऽवधारणार्थः मामेवपरमेश्वरंश्रीनारायणमव्यभि
चारेण एकांतभक्तियोगेनयः सेवतेस एतान्गुणान्समतीत्यसम्यगतिक्रम्यब्रह्मभूयायब्रह्मभावायकल्पते योग्योभवति २६ तत्रहेतुमाह ब्रह्म

मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः सर्वारंभपरित्यागीगुणातीतःसउच्यते २५ मांचयोऽव्यभिचारेणभक्तियोगेन
सेवते सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते २६ ब्रह्मणोहिप्रतिष्ठाऽहममृतस्याव्ययस्यच शाश्वतस्यचधर्मस्यसुख
स्यैकांतिकस्यच २७ इतिश्रीम॰ गुणत्रयविभागयोगोनामचतुर्दशोऽध्यायः १४

णोहीति हियस्माद्ब्रह्मणोऽहंप्रतिष्ठाप्रतिमाघनीभूतंब्रह्मैवाहम्
यथाघनीभूतः प्रकाशएवसूर्यमंडलंतद्वदेवेत्यर्थः तथाऽव्ययस्यनित्यस्यअमृतस्यमोक्षस्यच नित्यमुक्तत्वात् तथातत्साधनस्यशाश्वतस्यचधर्मस्य शुद्ध
सत्वात्मकत्वात् तथाएकांतिकस्यअखंडितस्यसुखस्यचप्रतिष्ठाऽहम् परमानंदैकरूपत्वात् अतोमत्सेविनोमद्भावस्यावश्यंभावित्वाद्युक्तमेवोक्तंब्रह्मभू- ८४
यायकल्पतइति २७ कृष्णाधीनगुणासंगप्रसंजितभवांबुधिम् सुखंतरतितद्भक्तइत्यभाणिचतुर्दशे १ इतिसुबोधिन्यांटीकायांचतुर्दशोऽध्यायः १४

रना चाहिये ॥ ५९ ॥ हे पुत्र ! मा[illegible]रमें जैसी मुझे मथुरा प्रिय है उसके अभावमें पुष्कर प्रिय है वैसे प्रयाग इत्यादि प्रिय नहीं ॥ ६० ॥ बुद्धिमानोंको मथुरामें वा पुष्करमें पूर्णिमाकेदिन स्नान करना चाहिये अथवा उनके अभावमें दूसरी जगह विधिपूर्वक स्नानादि करै ॥ ६१ ॥ जो पूर्णिमाको स्नान दान पूजा आदि नहीं करता वह साठ सहस्र वर्षतक रौरवादि नरकोंमें पड़ता है ॥ ६२ ॥ अत एव बुद्धिमानोंको सब प्रयत्नपूर्वक पूर्णिमा माननीय है मार्गशिर महिनेकी

यादृशी मथुरा पुत्र सहोमासे मम प्रिया ॥ न तथा तीर्थराजाद्यास्तदभावे च पुष्करम् ॥६०॥ पुष्करे मथुराया वै पूर्णा कार्या विचक्षणैः ॥यत्र कुत्रापि वा कार्या विधियुक्ता च पूर्णिमा ॥ ६१ ॥ स्नानं दानं तथा पूजां पूर्णायां न करोति यः॥ षष्टिवर्षसहस्राणि पच्यते रौरवादिषु ॥६२॥ तस्मात्सर्वप्रयत्नेन मान्या पूर्णा विचक्षणैः ॥ मार्गशीर्षेण संयुक्ता अनंतफलदायिनी ॥६३॥ यथा मे कथितं वत्स मार्गशीर्षं मम प्रियम् ॥ करोति यो नरो भक्त्या तस्य पुण्यफलं शृणु ॥६४॥ तीर्थायुतेषु यत्पुण्यं यत्पुण्यं व्रतकोटिभिः ॥ सर्वयज्ञेषु यत्पुण्यं तत्फलं समवाप्नुयात् ॥ ६५ ॥ अपुत्रो लभते पुत्रं निर्धनो धनमेव च ॥ विद्यार्थी च तथा विद्यां रूपार्थी रूपमाप्नुयात् ॥६६॥ ब्राह्मणो ब्रह्मवर्चस्वी क्षत्रियो विजयी भवेत् ॥ वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात् ॥६७॥

[illegible]दायिनी है ॥ ६३ ॥ हे पुत्र ! जैसे मैंने अपने प्रिय मार्गशिरके स्नानादिको कहा उसे जो मनुष्य भक्तिपूर्वक करता है उसके पुण्यका फल [illegible]ों तीर्थोंमें और करोड़ो व्रतोंमें और संपूर्ण यज्ञोंमें जो फल है वही फल इससे प्राप्त होता है ॥ ६५ ॥ पुत्ररहित पुत्रको, निर्धन धनको, विद्यार्थी [illegible] रूपको पाता है ॥ ६६ ॥ ब्राह्मण ब्रह्मवर्चस्वी (वेद जाननेमें कुशल), क्षत्रिय विजयी, और वैश्य, निधिओंको

॥ इति भाषाटीकासहितमार्गशीर्षमाहात्म्यं समाप्तम् ॥